BENARES SANSKRIT SERIES;
A
COLLECTION OF SANSKRIT WORKS
EDITED BY THE
PANDITS OF THE BENARES SANSKRIT COLLEGE,
UNDER THE SUPERINTENDENCE OF
G. THIBAUT, PH. D.
No. 146.

श्रीमद्भागवतदशमस्कन्धस्थरासपञ्चाध्यायीव्याख्या ।

गूढार्थदीपिका ।

पण्डितवर–श्रीधनपतिसूरिकृता ।
रसव्याख्या च ।

श्रीमदाचार्यश्रीवल्लभाधीश्वर–श्रीविठ्ठलनाथदीक्षितशुद्धाद्वैत-
संप्रदायविदुषा रत्नगोपालभट्टेन परिशोधिते ।

GÛDHÂRTHADÎPIKÂ,

A Commentary on Râsa Panchâdhyâyî
of the Tenth Chapter of Śrîmad Bhâgawata,
BY PANDIT DHANAPATI SÛRI;
And RASAVYAKHYA.

Edited By Ratna Gopâl Bhatta.

Fasciculus. III.

BENARES:
Published by the Proprietors Messrs. Braj B. Das & Co.
AND SOLD BY H. D. GUPTA,
Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ Vilâs Press
By Harikrishna Dasa.
BENARES.
1908.

सूचीपत्रम् ।

	रु०	आ०	पा०
गणपाठः	०	४	०
गोलप्रकाशः	२	८	०
गंगालहरी	०	१	०
गुरुसारणी	०	४	०
जातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रहः	०	१	०
दत्तकमीमांसा	०	८	०
धर्मशास्त्रसंग्रहः	०	१	६
धातुपाठः (शिला -))	०	२	०
धातुरूपावली (शिला)॥।)	०	१	६
परिभाषापाठः	०	०	६
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
फक्किकाप्रकाशः	०	८	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	४	०
मनोरमा शब्दरत्नसहिता	७	०	०
मुहूर्तमार्तण्डः सटीकः	०	८	०
लघुकौमुदी टिप्पणीसहिता	०	३	०
लघुकौमुदीभाषाटीका (पं० मथुराप्रसादमिश्र कृत) (टिप्पणीसहित)	४	०	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
विष्णु सहस्रनाम	०	१	०
व्याकरणकौमुदी (उपक्रमणिका का दूसरा भाग)	१	०	०
शब्दरूपावली	०	०	९
शृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
सिद्धान्तकौमुदी (पं० वामनाचार्येण संशोधिता)	१	८	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	२	०	०
उपसर्गवृत्ति	०	१	०
क्षेत्रकौमुदी	०	३	०
क्षेत्रसंहिता	१	०	०

निजजने यः स्मयस्तेन, निजजनस्मयध्वंसनं स्मितं यस्य । अतो यथोक्तप्रवृत्तिं दृष्ट्वा वयमपि सम्प्रति मरणायोद्युक्तास्तस्मात् तवा-स्मज्जीवनमपेक्षितं भवेत्तर्हि शीघ्रमागत्य भवत्किङ्करीरस्मान् भज सेवनायाश्रय । शठं प्रति शठं कुर्यादित्युक्तत्वाद्यथा सखापि भवानस्मद्दुखाय तिरोहितस्तथा सख्योऽपि वयं तव दुःखाय धूर्तशिरोमणेस्तवाग्रे तिरोधानसामर्थ्याभावान्मरिष्याम इति सूचयन्त्यः सम्बोधयन्ति ॥ हे सख इति ॥ किञ्च झटिति जलरुहाननं चारु दर्शय अन्यथा पश्चात्तापं करिष्यसीति भावः । यद्वा, जिघांसन्तं जिघांसीयादित्युक्तत्वात् सर्वा दण्डयितुं किमर्थं प्रवृत्तोऽस्यत एता भवत्किङ्करीः भज यथेष्टं सेवय, नोऽस्माकं तु चारु जलरुहाननमात्रं दर्शय । अपकर्तुरपि सख्युर्मुखदर्शनेच्छा न निवर्तते । इदं प्रार्थयामः । किं कुर्म इति, सख इति सम्बोधनाशयः ॥

निवृत्तिपक्षे, स्वानुग्रहादुपनिषत्सु लब्धाग्रहस्य व्रजो वेदस्तत्सम्बन्धिन आस्तिकशिरोमणिभूतस्य जनस्यार्त्तिं जन्ममरणलक्षणसंसृतिदुःखं हरतीति तथा । यतो योषितां श्रुतिलक्षणस्त्रीणामस्माकमस्मदीयानां च रक्षणे परमसमर्थ ॥ रक्षणप्रकारमाहुः ॥ निजजनानां स्वभक्तानां स्मयस्याऽहङ्कारादिदोषस्य ध्वंसनाय स्मितं मन्दहासो यस्य । हासोजनोन्मादकरी च मायेति हासशब्दाभिधेयायाः सर्वानर्थबीजभूताया मायाया मन्दत्वं स्वभक्तेष्ववर्तनं तस्मात्, सखे सर्वदास्मत्संपृक्त, भवत्किङ्करीर्भवत्प्रतिपादनरूपसेवापरायणा, अस्मत्प्रतिपाद्यतामाश्रय । तथा च विवेक्यन्तःकरणेऽस्मत्प्रतिपाद्यतां प्राप्य, तस्य जलरुहस्य चतुर्दशभुवनात्मकपुष्करस्य कमलस्य चाननं सत्तास्फूर्तिप्रदं स्वरूपं दर्शय । को ह्येवाऽन्यात् कः प्राण्याद् यदेष आकाश आनन्दो न स्यादित्यादिश्रुत्या सर्वसत्तास्फूर्तिदः परम स्म प्रतिपादित इति प्रकाशयेत्यर्थः ॥ ६ ॥

अन्याः प्रार्थयन्ति ॥

प्रणतदेहिनां पापकर्षणं
तृणचरानुगं श्रीनिकेतनम् ॥
फणिफणार्पितं ते पदाऽम्बुजं
कृणु कुचेषु नः कृन्धि हृच्छयम् ॥ ७ ॥

प्रणतेति ॥ पदाऽम्बुजं नः कुचेषु कृणु कुरु बहुवचनं समुदायाभिप्रायेण । ते त्वदीयानां न इति वा । ननु विरहानलज्वालातप्तेषु स्तनेष्वतिसुकुमारचरणस्थापनप्रार्थनं नोचितमिति चेत् तत्राहुः ॥ फणिनः कालियस्य शेषस्य फणासु अर्पितम् । तथाच परमकोमलमपि विलक्षणशक्तिमत्त्वान्न केनापि पीडयितुं शक्यमिति भावः । ननु तथापि स्तने चरणस्पर्शो नोचित इतिचेत्तत्राहुः ॥ श्रीनिकेतनम् । लक्ष्म्यावासस्थानम् । तथाच श्रीर्यत्र सर्वदा तिष्ठति तस्य स्तनेषु स्पर्शोऽन्यासां कः सन्देह इति भावः । ननु कामाक्रान्तत्वेनतया निकृष्टानां युष्माकमनुरोधो नोचित इतिचेत्तत्राहुः ॥ तृणचरानुगम् ॥ यथा भगवता पाल्यमाना अपि गावस्तृणं परित्यज्याऽमृतं नाश्नन्ति, किन्तु तृणमेव तासाममृतं तथापि कृपालुना त्वया नोपेक्ष्यन्तेऽपि तु तदनुरोध एव क्रियते, तद्वद्भगवदीया अपि वयं यद्यपि कामासक्तास्तथापि नोपेक्ष्या इति भावः । ननु तथापि युष्माकमजितेन्द्रियत्वादिसम्पादकं पापं वर्ततेऽतस्तत्सत्त्वे कथं मत्पादस्पर्शाधिकारस्तस्मात्तन्निवर्तककर्मानुष्ठानानन्तरं तथा करिष्यामीतिचेत्तत्राहुः ॥ प्रणतदेहिनां पापकर्षण प्रकर्षेण धर्मत्यागपूर्वकं ये नताः देहाभिमाननिवर्तकतत्त्वज्ञानरहिताश्च तेषां पापनिवर्तकयोः स्वधर्मतत्त्वज्ञानयोरभावात्

त्वत्पदाऽम्बुजमेव स्मृतं दृष्टं स्पृष्टं वा तन्निवर्तकं नान्यदतस्तथाभूता-
नामस्माकं तेनैव पापनिवृत्तिसंभवान्नानुष्ठानान्तरमपेक्षितमिति भावः
तत्र तदर्पयित्वा हृच्छयं कामं कृन्धि विनाशय । तथाच न पापनिवृत्ति-
रस्माकमभिलषिता, किन्तु कामस्य निवृत्तिरिति भावः । यद्वा भवत्यः
कामोपाधिकप्रीतिमत्यो न दर्शनमात्रस्याधिकारिण्य इतिचेत् तत्रा-
हुरेवञ्चेत्तर्हि तत्प्रतिबन्धकं काममेव कृन्धि । कथमित्यपेक्षायामाहुः ॥ नः
कुचेषु त्वपदाऽम्बुजं कुरु । ननु न जातु, कामः कामानामुपभोगेन
शाम्यति * हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धत इत्युक्तत्वा-
त् तत्स्थापनेन न तन्निवृत्तिर्भविष्यति, किन्तु प्रत्युताभिवृद्धिरि-
ति शङ्कापि पदस्थापनप्रार्थनया निराकृता । हस्तस्थापनस्य तदभि-
वृद्धिहेतुत्वात् । ननु तत्स्थापनस्याऽभिवृद्धिहेतुत्वाभावेऽपि कथं
तन्निवृत्तिहेतुत्वमित्याशङ्क्याहुः ॥ फणीति ॥ तथाच कालियफणा-
र्पणेन यमुनाह्रदस्य निर्विषत्वं त्वया संपादितम् । तद् दृष्ट्वा देह-
लक्षणफणिनः कुचलक्षणफणार्पणेन यमुनाह्रदस्थानीयहृदयस्य
कामरूपविषस्य निःसरणेन निर्विषत्वसंपादनसमर्थत्वमित्यनुमीमह
इति भावः । न केवलं दोषानिवर्तकमात्रं किन्तु गुणाधायकमपीति
द्योतनायोक्तं— श्रीनिकेतनम् ॥ तथाच तत्त्वात्द्ब्रह्मज्ञानैश्वर्यादिलक्ष-
णश्रियः स्पर्शमात्रेणाधायकमिति भावः । ननु परमोत्कृष्टस्य मत्पदा-
ऽम्बुजस्य स्पर्शोऽपि दुर्लभ इत्याशङ्कानिरासायोक्तं— तृणचराऽनु-
गम् ॥ तथाचास्मदधिकाराभावेऽपि तव करुणया तस्य सौलभ्यमिति
भावः । ननु तथापि पापनिवृत्तिं विना कथं तत्सम्भव इत्याशङ्का-
निवृत्त्यर्थमुक्तं— प्रणतेति ॥ अनभिज्ञापक्षे. अथ हृत्तापशान्तिकरोप-
लेपौषधमिव बहिर्हृदि अङ्गसङ्गमभीप्सन्त्यो दैन्येन चरणसङ्गमे-
व प्रार्थयन्ते ॥ प्रणतेति ॥ ते पदाऽम्बुजमस्माकं तप्तेषु कुचेषु नि-
धेहि । ननु पापभयान्नैवं कर्तुं शक्नोमीति चेत् तत्राहुः ॥ प्रणतानां

नलकूबरादीनां स्थावरत्वादिप्रदपापस्य कर्षणमतस्तेन तत्र का पापप्राप्तिसंभावनेति भावः । यद्वा, ननु किमिति करपङ्कजस्थापनं न प्रार्थ्यत इत्याशङ्क्य स्वापराधनिवृत्त्यर्थमादौ पदाऽम्बुजस्थापनमेव प्रार्थ्यत इत्याशयेनाहुः ॥ प्रणतेति ॥ प्रणतानामस्मदादीनामपराधनाशकामित्यर्थः । ननु नैवं प्रार्थनीयं, कठिनेषु तेषु स्थापनेन मृदुलस्य चरणस्य पीडोदयादित्याशङ्क्याहुः ॥ तृणाचरानुगम् ॥ तृणशर्कराद्यत्यन्तकठोरवस्तुषु स्थापनादेवंकृतेनाधिकं दुःखमिति भावः । अनेन यथा तृणचरानुग्रहवशात् तदनुगमनजन्यपादपीडा त्वया न गण्यते तथास्मदनुग्रहवशादपि सा न गणनीयेत्यपि ध्वनितम् । ननु नानारत्नालङ्कारालङ्कृतेषु युष्मत्कुचेषु पादार्पणं न शोभत इतिचेत् तत्राहुः ॥ श्रीनिकेतनम् ॥ नखचन्द्रादिशोभास्पदत्वात्तनोऽप्यधिकालंकृतिकरमिति भावः । ननु युष्मद्धृदयस्थतापजन्यदाहः कथं सोढुं शक्य इतिचेत् तत्राहुः ॥ फणीति ॥ भवतु किं तत इति चेत्तत्राहुः ॥ हृच्छयं कामं कृन्धि, पश्चाद्यथा कामोपशमः स्यात्तथा कुरुष्वेति भावः ॥ मानिनीपक्षे, ननु युष्मद्दर्शनमात्रस्य कामोद्दीपनत्वान्मानवतीनां युष्माकमालिङ्गनादेर्दुर्घटत्वात् कामबाधाभयान्नाहमाविर्भवामीतिचेत् तत्राहुः ॥ प्रणतेति ॥ अहो सत्यमिदं, तथाप्यागन्तव्यमागत्य च नः कुचेषु यथाकथञ्चित् पदाऽम्बुजं कृणु । एतावन्मात्रमस्माभिरनुज्ञायत इति भावः । नन्वेतावता मम प्रयोजनं कथं भवतीतिचेत् तत्राहुः ॥ कृन्धीति ॥ अस्माकं लोकोत्तरसौन्दर्य्यत्वादेतावतैव तत्र च्युतिर्भविष्यतीति व्यङ्ग्यम् । ननु सर्वोत्तमानां युष्माकं पादेन स्पर्शे कृते पापं भविष्यतीति नाहं तथा कर्तुं शक्नोमीति चेत्तत्राहुः ॥ प्रणतेति ॥ ननु परमकोमलस्य पदाऽम्बुजस्यातिकठोरयुष्मत्कुचस्पर्शेन पीडा भविष्यति, तथाच तया व्याप्तहृदयस्य मम रसाविर्भावो दुर्लभस्ततः करा-

ऽम्बुजार्पणमनुज्ञायतामितिचेत्तत्राहुः ॥ तृणेति ॥ अहो प्रत्यक्षाप-लापपरायण धूर्तशिरोमणे तृणशर्कराद्यपेक्षयाऽस्यस्मत्कुचाः किं कठोरा इति भावः । ननु भवतु, यथाकथञ्चित्स्थापयिष्यामि, तथापि तेन कुचानां शोभा नङ्क्ष्यतीतिचेत्तत्राहुः ॥ श्रीति ॥ शोभा-निवृत्तिभयं न कार्यं, तव चरणस्य शोभास्पदत्वं त्वस्माभिर्ज्ञायत इति भावः। ननु मदीयेन तिरोधानरूपापराधेन भवतीनामन्तःकरणे म-हाक्रोधो वर्तते । तथाच क्रोधानलज्वालया तद्दाहावश्यम्भावात् क-थं रसानुभव इतिचेत्तत्राहुः ॥ फणीति ॥ अहो किमित्येवमनु-भूताद्भुतसामर्थ्यानामग्रतो बहुविधचातुर्यं प्रकाश्यते त्वया, न हि कालियविषाऽदग्धस्यान्येन केनचिद्दाहः सम्भवतीति भावः । तस्मा-द्भयं विहायागन्तव्यमिति भावः ॥

निवृत्तिपक्षे, नन्वन्तःकरणशुद्धिं विनेदं कथं भविष्यतीति चेत् साऽपि त्वदधीनेत्याशयेनाहुः ॥ प्रणतेति ॥ तव पदाऽम्बु-जोपासनेन हि तस्य शुद्धिर्भवत्यतस्तन्नः कुचेषु कर्मोपासनप्रतिपा-दनभागेषु कुरु भगवत्त्वत्पदाऽम्बुजाराधनमेव कर्मोपासनाकाण्डयोरर्थ इत्यधिकारिचेतसि प्रकाशयेत्यर्थः । यतस्तव पदाऽम्बुजं फणिनः शेषस्य फणास्वर्पितम् । तथाच नारायणपरा वेदाः नारायणपरा मखाः ❋ नारायणपरा योगा नारायणपराः क्रिया इत्युक्तत्वाच्छेष-शायिनो नारायणस्य भगवतस्तव पदाऽम्बुजसेवनमेव काण्डद्वयार्थ इति भावः । यतश्च श्रीनिकेतनं भोगमोक्षश्रीप्रदम् । यतश्च साध-कानुग्रहार्थं रामकृष्णाद्यात्मनाऽवतीर्णस्य तव तृणचराऽनुगम् । गोमृगाद्यनुगमनपरम् । तृणचरैस्त्यक्तसर्वभोगैस्तपस्विभिरनुगम्यत आराध्यत इति तदिति वा । यतश्च प्रकर्षेण नतिमात्रमपि कृतवतां देहिनां समस्ततापोच्छेदकम् । तदुक्तम् । एकोऽपि कृष्णस्य कृतः प्रणामो दशाश्वमेधाऽवभृथेन तुल्यः ❋ दशाश्वमेधी पुनरेति जन्म

कृष्णत्वणामी न पुनर्भवायेति।एवम्भूतेन काण्डद्वयप्रतिपादितेन सम्यगुपासितेन निजजनस्य हृच्छयं कामं कृन्धि विनाशयेत्यर्थः॥७॥

अपरा एतावता दुःखनिवृत्तिमपश्यन्त्यः प्रार्थनानां किं दारिद्र्यमिति विचिन्त्य परमोत्कृष्टं वस्तु प्रार्थयन्ते ।

मधुरया गिरा वल्गुवाक्यया
बुधमनोज्ञया पुष्करेक्षण ॥
विधिकरीरिमा वीर मुह्यती-
रधरसीधुनाऽऽप्याययस्व नः ॥ ८ ॥

मधुरयेति ॥ मां हि पार्थव्यपाश्रित्य येऽपि स्युः पापयोनयः * स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम् । कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति । सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज । अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच इत्यादिरूपया मधुरया अर्थतोऽत्यन्तमिष्टया वल्गूनि मनोज्ञानि वाक्यानि यस्यां तया शब्दतोऽप्यत्यर्थं मधुरया । अत एव, बुधमनोज्ञया बुधानां विदुषां हृद्यया विधिकरीः किङ्करीरस्मान् । तथाच नास्माकमविचारतो प्रवृत्तिरिति भावः । संप्रति तिरोधानलक्षणया लीलया मुह्यतीर्मूर्छां मरणपूर्वावस्थां लभमाना इमा झटित्यागत्य द्रष्टव्याः । हे पुष्करेक्षण पुष्करे हृदयकमल ईक्षणं यस्य सः । तथाचान्तर्यामिणा त्वया सर्वं ज्ञायत एव, नास्ति विज्ञापनकृत्यमिति भावः । विशालनेत्रेण त्वयेदमागत्य प्रत्यक्षेणोपलब्धव्यमिति वा । दृष्ट्वा च स्वाधरामृतेन नोऽस्मानाप्याययस्व सञ्जीवय । यतो हे वीर, निजजनार्तिनिराकरणमेव शौर्यकृत्यमिति भावः । याः स्वभावत एवाज्ञाकरीः संप्रति विरहदुःखेन मुह्यतीरस्मानागत्याप्याययस्व । कथ-

मिति चेद्रादौ गिरा । ननु वाणीमात्रेण कथं मोहनिवृत्तिरिति चे-त्तत्राहुः ॥ मधुरयेति ॥ मायामयस्य मोहस्य सच्चिदानन्दरूपस्य तव मुखान्निःसृतया माधुर्यव्याप्तया तापनिवृत्तिरवश्यं भविष्य-तीति भावः। तत्रापि सत्यप्रियहितार्थकत्वाद्वल्गूनि वाक्यानि यस्यां सा । तत्रापि बुधमनोज्ञया ज्ञानरूपया । यच्च तन्निवृत्तौ प्रतिबन्ध-कं तदप्यागन्याविष्कुर्वित्याशयेनाहुः ॥ पुष्करेक्षण । तथाच लो-कोत्तरसौन्दर्याद्यलङ्कृतविग्रहं दर्शयित्वा तद्दर्शनाभिलाषं निव-र्तय तथाऽधराऽमृतपानेच्छामपि तत्प्रदानेन पूरयेत्याशयेनाहुः ॥ अधरेति ॥ सर्वमपि कर्तुं प्रदातुं च समर्थोऽसीति द्योतयन्त्यः स-म्बोधयन्ति ॥ हे वीरेति ॥ अनभिज्ञापक्षे, न केवलं बहिर्हृदि लेप-मात्रेणास्य तापस्य शान्तिः कर्तुं शक्या किन्त्वत्रोपायबाहुल्यम-पेक्षितमित्याहुः ॥ मधुरयेति ॥ नोऽस्मानाप्याययस्वाऽऽह्लादय यतो मुह्यतीरुपान्त्यां दशां प्राप्ताः कथमिति चेत् तत्राहुः ॥ गिरा तत्रापि, न प्रतियात व्रजमिति वज्रवत्कठोरया, किन्तु मधुरया । नापि, स्वागतमितिवत् प्रतारणरूपयेत्याहुः ॥ वल्गुवाक्यया ॥ य-द्यपि मुग्धानामस्माकं नास्ति विवेकस्तथापि त्वया बुधजनमनो-ज्ञैव सा प्रयोक्तव्येत्याशयेनाहुः ॥ बुधेति ॥ तथाचैवंविधया गिरा वयं वक्तव्या इत्येको मूर्च्छानिवृत्त्युपायः । द्वितीयमाहुः ॥ हे पुष्करेक्षण । तथाच कमलवद्विशालनेत्राभ्यां वयं सम्यग् द्रष्टव्या इति भावः । तृतीयमाहुः ॥ अधरेति ॥ तथाभूतम् । अमृतरूपमौष-धं मृतानामप्युज्जीवनकरं पाययितव्यमिति भावः । तत्रापि विल-म्बो नोचित इत्याहुः ॥ इमाः क्षणमात्रमपि विलम्बासहाः । ननु मम का भवत्यो यदर्थमेवंविधपरिश्रमो मया कर्त्तव्य इत्याशङ्क्या-हुः ॥ विधिकरीरिति ॥ तथाप्यनल्पमिदमौषधं दातुं न शक्नोमी-तिचेत् तत्राहुः ॥ वीर ॥ परमोदारत्वाद् दानशूर सर्वस्वमपि दातुं

समर्थं। यद्वा यथोक्तोपायेन गतमूर्च्छा भवत्यो यथोक्तोपायकर्त्रे स-र्वदायं मह्यं किं प्रदास्यथेति चेत्तत्राहुः ॥ विधिकरीरिति ॥ जन्म-जन्मान्तरेषु तव किङ्कर्यो भविष्यामो, न वाऽन्यत् किञ्चित् तुभ्यं दातुं वयं योग्यास्तस्मादेतत्प्रतिनिधिभूतस्यैतरवस्तुनोऽभावा-च्छरीरमेवार्पयिष्याम इति भावः । तावतापि नास्ति ऋणपरिहारो-यद्यपि तथापि दानशूरेण त्वया न किमपि विचार्यं, प्रत्युपकारान-पेक्षदानस्यैव सात्त्विकत्वाभिधानात् ॥ मानिनीपक्षे, ननु नैतावता मम हृच्छयस्य शान्तिर्भविष्यति, तदुपशामकमस्त्येकं युष्मत्सन्निधौ वस्तु तथापि भयान्न तत्प्रार्थयामीति सदैन्यप्रार्थनामालक्ष्याहुः ॥ मधुरयेति ॥ कठोरा भव मृद्वी वा प्राणस्त्वमसि राधिके * अस्ति नान्या चकोरस्य चन्द्रलेखां विना गतिरित्यादिरूपया मधुरया व-ल्गुवाक्यया प्रतारणरूपया अत एवाऽबुधमनोज्ञया गिरा पूर्वं तव-वचनकर्य्यो वयं जाता, अत एव संप्रति प्रतारणफलभोगसमये मु-ह्यन्त्यः मरणोपान्त्यदशां प्राप्ता यद्यप्येवं तथापि सज्जनैरपकर्ताप्युप-कर्त्तव्य इति न्यायमनुसृत्यास्माभिरनुज्ञायतेऽस्माकमधराऽमृतेन स्वात्मानमाप्याययस्वागत्याह्लादय भयात्तिरोहितो मा तिष्ठेति भा-वः । भ्रूलक्षणधनुर्द्वयेक्षणलक्षणाऽक्षयवाणधीरो वीरशिरोमणिस्त्वं किमर्थं बिभेषीति संबोधनद्वयाशयः ॥

निवृत्तिपक्षे, तस्मात्साधकानुग्रहार्थं लीलाविग्रहमादाय, न हि ज्ञानेन सदृशं पवित्रमिह विद्यते * उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतम् । क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत, अना दिमत्परं ब्रह्म न सत्तन्नासदुच्यते, यदा भूतपृथग्भावमेकस्थम-नुपश्यति, तत एव च विस्तारं ब्रह्म संपद्यते तदेत्यादिरूपया मधु-रया यथाभूतार्थप्रतिपादकत्वाद्वल्गुवाक्यया । अत एव बुधजनमनो-ज्ञया तवौष्ठपुटनिःसृताऽमृतरूपया नोऽस्मान् आप्याययस्व । य-

तस्त्वद्वाग्युद्धावितमिथ्याभूताऽतिकर्कशतर्काऽतिपुष्टवादान्धकारेण, मुह्यतीर्नचोपेक्ष्या, यतो विधिकरीर्भवदाज्ञारूपाविधिमतिपादिका-स्तव किङ्करीभूताः । अतस्तथाभूतया गिराऽवश्यमस्मान् पालय । अनेन धर्मसंस्थापनरूपः स्वपालनहेतुरुक्तः । साधुपरित्राणरूपं द्यो ः न्त्यः संबोधयन्ति ॥ पुष्करेक्षण ॥ सौन्दर्य्यादिगुणालंकृतविग्रहे-ण स्वस्मिन्नासक्तिसंपादनेनास्मान् परिपालयेति भावः । अस्मत्पा-लनाय दुष्कृतिनोऽपि नाशयेत्याशयेनाहुः ॥ वीरेति ॥ ८ ॥

तव कथाऽमृतं तप्तजीवनं
कविभिरीडितं कल्मषापहम् ॥
श्रवणमङ्गलं श्रीमदाततं
भुवि गृणन्ति ये भूरिदा जनाः ॥ ९ ॥

ननु युष्माकं प्रेमातिरेकपरीक्षार्थमन्तर्हितोऽहं, ततश्च संप्रति ज्ञातवानहं नाद्यापि भवत्यो मत्प्रेमातिरेकभूमिमारूढा, मद्विरहेऽपि जीवनधारणादित्याशङ्क्य,नास्माकमपराधस्तव कथा त्वत्सदृशगुणा-ऽस्माञ्जीवयति, वयं किं कुर्म इत्याशयेनाहुस्तवेति ॥ तव कथाऽमृत-म्, अत एव तप्तानामस्माकं जीवनम् । तत्र प्रमाणमाहुः ॥ कवि-भिः क्रान्तदर्शिभिः सर्वज्ञैर्नारदादिभिरीडितं स्तुतम् । एतेन प्र-सिद्धाऽमृतादुत्कृष्टत्वं सूचितम् । तद्धि विषयार्थिभिः स्तूयते, न तु कविभिः । किञ्च कल्मषापहम् । न हि प्रसिद्धं तत् कल्मषं निवर्त-यति, किन्तु निवृत्तकल्मषप्राप्यमिदं तु तन्नाशार्थं साधनान्तरं नापेक्ष-त इति भावः । किञ्च, श्रवणमङ्गलम् ॥ न हि तच्छ्रवणमात्रेण मङ्गलप्रदमिदं श्रवणमात्रेण मङ्गलरूपम् । किञ्च, श्रीमत् ॥ प्रसिद्धं तु तद् न श्रीमदम्, इदं मोक्षश्रीपर्यन्तं समस्तश्रीप्रदम् । यद्वा श्रीमत्तु शान्तं, तत्तु मादकम् । तत्राप्याततं चतुर्दशभुवनेषु व्या-

सं प्रसिद्धन्तु तत्तैवम् । अतो ये भुवि गृणन्ति तेऽस्माकं बहुप्रदाः परमोपकारकास्तस्मादेवं विधषड्गुणयुक्तेन भवत्तुल्येन जीवनहेतुत्वा-दतिरोहितत्वाच्च किञ्चिदधिकेन च तव कथाऽमृतेन त्वत्प्राप्त्यर्थं जीवामोऽतो न वयं परीक्षायोग्याः, किन्त्वनुकम्प्या इति भा-वः ॥ अनभिज्ञापक्षे. अहो महति संकटे निमग्नानां मरणमप्यस्मा-कं न भवति, किं कुर्म इत्याशयेनाहुः ॥ तव कथालक्षणममृतं प्रा-प्तानां मरणयोग्यानामप्यस्माकं जीवनसाधनं जातम् । ननु कुत-स्तल्लभ्यत इतिचेत् तत्राहुः ॥ कविभिः पूतनाघातादिकानां भव-च्चरितानां गीतविशेषरचनायां कुशलैरीडितं स्तुतम् । उत्तमश्लोक-नलादिचरितवत् कल्मषनिवर्तकम् । श्रवणमात्रेण मङ्गलकरं च यतः श्रीमत शोभायुक्तम् । न चैवंविधं किञ्चित् स्थानमस्ति यत्र तन्नास्तीत्याहुः ॥ आततं व्याप्तं, यतो ये भूरिदा महान्तो दा-तारस्त उत्तमश्लोकाश्च ते भुवि सर्वस्यामपि भूमौ तत्र तत्र स्थिता गृणन्ति । तस्मात् किमर्थं स्वविरहसंतापं भोजयितुं स्वकथाऽमृतेन जीवयसि । यदि सर्वथा तवानागमननिश्चयः स्यात्तर्हि किञ्चिदस्म-न्मरणोपायं रचयित्वा निश्चिन्ततया पलायस्वेति भावः । यद्वा, ननु मत्कथया क्षणमात्रजीवनं धार्यतामितिचेत् तत्राहुस्तव कथैव स्मृ-तिरुद्दीपनविधया मरणसाधनं यतस्तप्ते तैलादौ जीवनं जलमिव । अतः कविभिरननुभूतार्थकल्पनाकुशलैरेव कल्मषापहत्वेनेडितं स्तु-तम् । दुःखभागेन कल्मषानिवर्तकमिति वा । तथा श्रवणमङ्गल-मापातरम्यमतो व्यर्थमेव श्रीमदेन सौन्दर्याखर्वगर्वेण सर्वत्र प्रसृ-तम् । तस्मादस्मदग्रे ये गृणन्ति ते भूरिदा महाघातुकाः । दो-ऽवखण्डन इति स्मरणात् । तस्मादलं तव कथयेति भावः ॥ मा-निनीपक्षे. नन्वनेकगुणवत्त्वेन यत्कथाऽमृतं कविभिरीडितं तस्मि-न्नपि मयि भवत्यो नानुरज्यन्त इत्याशङ्क्याहुः ॥ तव कथेति ॥

कविभिरतिशयोक्तिपरैस्तप्तजीवनत्वादिरूपेणेडितम्. पिनत्कथाऽमृतं भूरिदा उदारा अस्मत्तुल्या जनाः श्रीमदेन ततं व्याप्तं गृणन्ति । अतो नास्माभिस्त्वय्यनुरज्यत इति भावः ॥

निवृत्तिपक्षे, किञ्च, तव चरित्रकथाऽमृतपानेनानेकेषामुद्धारो भविष्यतीत्याहुः ॥ तव कथाऽमृतं, यतः, तप्तानां विविधतापतप्तानां जीवनं तापनिवर्तकम् । यद्वा, पीता गाव इतिवत्तप्तानां ज्ञानिनां जीवनरूपम् । तप आलोचन इति स्मरण तु । यतः कविभिर्ब्रह्मविद्भिः सनकादिभिरीडितम् । किञ्च, न तत्र कथाऽमृतसेविनां कृच्छ्रचान्द्रायणादिकर्मापेक्षेत्याहुः ॥ कल्मषापहम् ॥ कथान्तरायभूतनिरयप्रदपापकर्मनिवर्तकम् । तत्रापि. श्रवणमङ्गलम् ॥ कृच्छ्रादि घोररूपत्वाच्छ्रवणेऽप्यमङ्गलम्, तवोदारचरिताऽमृतं तु श्रवणमात्रेणाप्यानन्दप्रदम् । नचापातरम्यमपि तु श्रीमद् वास्तवसमस्तोद्धारशोभालंकृतम् । अत एवाततं सर्वत्र व्याप्तं, न त्वेकदेशि तस्माद्ये भुवि अधिकारभूमौ गृणन्ति ते भूरिदा महान्तो दातारः सर्वयज्ञानुष्ठानसर्वस्वदक्षिणादिफलवन्तः । यद्वा ये जन्मान्तरेषु भूरिदास्त एवास्मिञ्जन्मनि गृणन्ति । यद्वा मुमुक्षूणामनुग्रहार्थं ये गृणन्ति ते भूरिदा जना, अभयदानसमं दानं नास्तीत्युक्तत्वाद् अभयदातृत्वेनानल्पदाः । यद्वा, ये गृणन्ति ते, भूरिदाश्च ते अजना विष्णुस्वरूपाश्च । हे भूरिदेति वा । तस्माल्लीलाविग्रहमादायास्मदुद्धारो लोकोद्धारश्चावश्यं सम्पाद्य इति भावः ॥ ९ ॥

ननु यावद्रमणं जातं तावत्तेन संतोषो विधेय. इतः परं च मत्कथाऽमृतपानेन जीवतीभिर्मद्ध्यानमेव संपाद्यमिति चेत् तत्राहुः

प्रहसितं प्रिय प्रेमवीक्षणं
विहरणं च ते ध्यानमङ्गलम् ॥

रहसि संविदो या हृदिस्पृशः
कुहक नो मनः क्षोभयन्ति हि ॥ १० ॥

प्रहसितेति ॥ हे प्रिय, हे कुहक, यद्यपि परमात्मा त्वं कपटलीलयाऽस्मत्प्रियविग्रहं प्रकटितवाँस्तथापि त्वद्विषयकरमणेच्छाऽस्माकं न निवर्तते । तादृशदोषवशादेव मनः स्थिरं न भवति । तत्र भगवतस्तव प्रहसितं प्रेमपूर्वकवीक्षणं विहरणं क्रीडनं च एतत्त्रितयं ध्यानेऽपि मङ्गलं, तथा रहसि याः संविदः क्रीडासंकेता हृदि स्पृशः अन्तःकरणे प्रविष्टास्तेऽस्माकं मनः क्षोभयन्ति क्षणमात्रं तदनुसंधानपरायणमपि मनः हा संप्रति भगवत्प्रहसितादिकं नोपलभ्यत इति वृत्त्युदये क्षुब्धं भवति । प्रहसितादयो यद्यपि गुणास्तथाप्यस्यां विरहदशायां दोषा जाता, अतो वयं किं कुर्म इति । बहुवचनेन बह्वीनामनुभवं प्रमाणयन्ति । हिशब्देन प्रसिद्धिं द्योतयन्ति ॥ अनभिज्ञापक्षे, तव कथायां क्रियमाणायां तत्र नान्तरीयकतया स्मृतानि प्रहसितादीनि मारकाणि बहूनि स्मृतिपथमारुहन्तीत्याहुः ॥ प्रहसितं प्रकर्षेणोच्चैर्हसितम् । अस्मान् दृष्ट्वैवात्यन्तप्रसन्नताविष्करणरूपं तव प्रहसितं संप्रति स्मृतं सदस्मन्मनःक्षोभकरं भवति । यतो हे प्रिय प्रियेण समक्षे कृतं यदानन्दावहं प्रहसितं तस्य विरहदशायां मरणावहमेव भवतीति भावः । तथा प्रहासानन्तरं यत् प्रेमपूर्वकं वीक्षणं विशिष्टं शोभनमीक्षणं कटाक्षद्वारा च केवलं वा तत् । तथा विहरणं सखिभिः सखीभिर्विहारः विशेषेण वेणुनादादीनां हरणमाकारणमिति वा । एतत्त्रितयम् अध्यानमङ्गलं ध्याने स्मरणे मङ्गलस्वरूपं न भवति, किन्तु दर्शन एव । तथा रहस्येकान्ते याः संविदस्ता अपि यतो हृदिस्पृशः फलपर्यवसायिन्यः सत्यो हृदयबिलौकसः । तदेतत्परमसुखकरमपि सर्वं तवानया

कपटप्रवृत्त्या परमदुःखावहं सम्पन्नमित्याशयेन संबोधयन्ति ॥ हे कुहकेति ॥ हि निश्चितं क्षोभयन्ति । अत्र संशयं विहाय स्वकुहककृतानिरामायासमन्मनःक्षोभं निवर्तयेति भावः ॥ मानिनीपक्षे, अहोऽस्माभिरदीर्घदर्शित्वादबुद्ध्यैव यदनुष्ठितं तस्य फलमिदानीमुपस्थितमित्याशयेनाहुः ॥ प्रहसितेति ॥ त्वया सह यदस्माकं प्रहसितं यच्च प्रियस्य तव प्रेमपूर्वकं वीक्षणम् । हे प्रियेति वा । प्रियं मत्वेति भावः । विहरणम् एतत्त्रयं ते ध्याने अहो एतामां कदा प्रहसितादिकं द्रक्ष्यामीति चिन्तने मङ्गलम् । यावत्तादृशं तव चिन्तनं स्थितं तावदेव त्वत्कर्तृकप्रार्थनादिरूपमस्माकममङ्गलं स्थितम् । संप्रति तव चिन्तनासिद्धावसरेऽस्माकं परममङ्गलं जातमिति भावः । तथा रहसि यास्तव हृदिस्पृशः संविदस्ताश्च नो मनः क्षोभयन्ति । अहो नायं प्रहसितादिपात्रभूतः स्थितोऽसौ वृथैवानभिज्ञस्याकृतज्ञशिरोमणिभूतस्याग्रे प्रहसितादिकमनुष्ठितं कुटिलभ्रूविजृम्भैश्चरणोपान्तयोरवस्थितस्तस्मान्मौर्ख्येण विपरीतमनुष्ठितमतः किं कुर्म इत्येवं स्मृतानि प्रहसितादीनि नो मनः पुनः पुनर्व्याकुलयन्ति । हि निश्चितम् । यथा कश्चिद्वञ्चकः सेवको भूत्वा दैन्यसेवनादिना मनो रञ्जयित्वा स्वस्मिन् विश्वासमुत्पाद्य मादकवस्तु प्रदाय सर्वस्वमादाय पलायते तथा त्वमपि कृतवानसि । अहो कष्टं, किं कुर्म इति कार्यावेशेन संबोधयन्ति ॥ हे कुहकेति ॥

निवृत्तिपक्षे, एवं रूपोऽपि त्वं जीवरूपेण स्वस्यैव वञ्चको जातस्तस्य वञ्चनहेतुभूतानि चेष्टितानि नो दुःखकराणीत्याशयेनाहुः ॥ प्रेति ॥ दुःखे सुखताभ्रमस्तथा, हे प्रिय अनित्यासत्येषु नित्यत्वसत्यत्वभ्रमः । तद्विषयाणां प्रेमपूर्वकमीक्षणं तथाऽशुचौ शुचित्वभ्रमाद्विहरणं तदेतत्त्रयं ध्यानेऽपि न मङ्गलम् । तथा रहसि विषयसंभोगवञ्चनास्तत्रापि हृदयप्रविष्टाः । सम्यगुत्पादिताभिनिवे-

था एतानि कुहकत्वं प्राप्तस्य तव चेष्टितानि नो मनः क्षोभयन्ति अहो किमिति नित्यमुक्तपरमात्मना स्वबन्धचेष्टितान्याश्रितानीति क्षोभं जनयन्ति हि निश्चितम् ॥ १० ॥

चलसि यद् व्रजाच्चारयन् पशू-
न्नलिनसुन्दरं नाथ ते पदम् ॥
शिलतृणाङ्कुरैः सीदतीति नः
कलिलतां मनः कान्त गच्छति ॥ ११ ॥

अहो रात्रौ परमकोमलपदपद्मकृतपलायनस्यास्मत्स्वामिनः का वा पीडा जाता स्यादित्यनुसन्धाय तु मूर्छावस्थामेवानुभावत्यस्मन्मनो यतो दिनेऽपि यदा त्वं व्रजाच्चलसि तदाऽपि मूर्छावस्थामेव गच्छतीत्याशयेनाहुः ॥ चलसीति ॥ यद्यदा व्रजात् पशून् चारयन् चलसि तदा हे नाथ नलिनात् स्थलकमलादपि सुन्दरं कोमलं ते पदं शिलैः सशूकवन्यधान्यकणिशैः तृणकुशकाशादितीक्ष्णाग्रतृणैरङ्कुरैश्च सद्यो भूमिं निर्भिद्य निःसृतैः सीदति क्लिश्येदिति नो मनः कलिलतामस्वास्थ्यं गच्छति प्राप्नोति । तत्र व्रजादिति प्रातरारभ्य खेदः । चलसीति चलनात् खेदः । त्वं चलसीत्युक्त्या तव पदं त्वस्मान् विहाय न गच्छति, त्वमेव बलात् तच्चालयसीति सूचितम् । तत्रापि पशून् चारयन् पशवश्च पर्वतारण्यकच्छरूपायां भूमौ चरन्ति, तदनुगमनं च नग्नपद्भ्यां भूम्याद्यनुग्रहार्थं पाल्यानां चर्मणोऽपरिधेयताबुद्ध्या पादुकाग्रहणात् । नलिनरूपत्वाच्च कोमले स्थाने अस्माकं वा अङ्के स्थातुं योग्यम् । नाथेति संबोधनाद् बहव एवात्रार्थे नियोज्याः सन्ति तथापि स्वयं चलसीत्यत्यन्ताश्चर्यमिति ध्वनितम् । कान्तेति संबोधनात्त्वेतदस्मद्दुःखावहमिति सूचितम् ॥ अनभिज्ञपक्षे, किञ्च,त्वास्मिन्नत्यन्तार्द्रस्वान्तास्त्वस्मासु कपटाचरणं न न्याय्यमित्या-

हुः ॥ चलसीति ॥ यद्वा, न केवलमधुनैवास्मद्दुःखाय स्वात्मानं दुःखयस्यपि तु सर्वदैव तवेयं रीतिरित्याहुः ॥ चलसीति ॥ कलिलतां व्याकुलताम् । यद्वा कलिं कलहं लाति गृह्णातीति कलिलं तस्य भावः कलिलता कलहकर्तृता, तां गच्छति प्राप्नोति । वाक्कलहं करोतीति यावत् । तथाहि अहो वने भ्रमतः कृष्णस्य परमं कोमलं पदं सीदति, अरे मनः नैवं, तथा चेत् प्रत्यहं तत्र न गच्छेत् । तस्मात् किमर्थं वृथा खिद्यसि । अयि निर्बुद्धिगोपालिका मदीयं पादयुगलं स्थलपद्मादपि कोमलतरं किं न पश्यत । अरे मुग्धमनः वालुकामये सुकोमले पथि पदं स्थापयत्यतो न सीदति । तत्रापि विचारविधुराः पशवः किं तथाभूते स्थले चरन्त्यतस्तान् चारयँस्तदनुगच्छति तदा तदीयं पदं शिलादिभिः कथं न सीदति । अरे प्रेमान्ध विशालनेत्रोऽसौ त्वदुपरि पदं किमर्थं स्थापयति । अयि प्रेमलेशेनापि विधुरा तदनुभ्रमणकाले तदुपर्य्यवश्यं पदं पतत्येव, तेन च पीडा भवत्येव । अहो भो भ्रातश्चेतः सत्यमुक्तं त्वया, नास्त्यसावस्मदधीनो येन वयं तं चारयामोऽत एवंविधदुःखं सहन्त्यो जीवेम । अस्मदर्थमेव विधात्रा सृष्टत्वात् । भो दुःखिन्यो जीवन्तु भवत्योऽहं तु युष्मत्कान्तपददुःखं द्रष्टुं नालमतो युष्मद्देहेभ्यः प्राणैः सार्द्धमधुनैव यामीति ॥ मानिनीपक्षे, अहो वृथैव वयं त्वामुपालब्धुं प्रवृत्ताः । स्वाङ्गेषु दयालेशरहितस्यान्यत्र तत्प्रसक्त्यभावादित्याशयेनाहुः ॥ चलसीति ॥ हे नाथ शोभनवस्तुपालनोपतापनस्वभाव । यदा पशून् चारयन् चलसि तदा शिलादिभिः परमकोमलं पदं सीदति, नो मनः कलिलतां दयया आर्द्रीभावं गच्छति परमकठोरान्तःकरणस्य तव तु तत्र करुणालेशोऽपि नोत्पद्यते । अतः कान्त कस्य स्वकीयस्य परकीयस्य च सुखस्यान्त नाशक । तथाचैवंविधकठिनचित्तस्तु विधातृसृष्टौ कोऽपि नासीन्नास्ति न

भविष्यति चेति भावः ॥

निवृत्तिपक्षे, पुनः क्षोभकरां तच्चेष्टामावेदयन्ति ॥ यत् यदा व्रज.देहमध्यात् पशूनिन्द्रियलक्षणान् चारयन् विषयलक्षणेषु मार्गेषु भ्रामयन् स्वयमपि चलसि, अहं श्रोता स्प्रष्टेत्याद्यभिमानवान् भवसि तत् तदा पद्यते गम्यते इति पदं सच्चिदानन्दघनस्वरूपं नलिनं चतुर्दशभुवनात्मकपदं सुन्दरं येन पदाधिष्ठितं सत्सुन्दरतया प्रतीयते तत् तथाभूतपदं यथोक्त्या शिलतृणाङ्कुरस्थानीयैराध्यात्मकाधिदैविकाधिभौतिकसंज्ञैर्दुःखैः सीदतीति कृत्वा नो मनः कलिलतां व्याकुलतां गच्छति । यतो हे नाथ स्वतन्त्रस्य तवैवंविधं पारतन्त्र्यमामाद्य दुःखोपभोगो नोचित इति भावः । किञ्च, हे कान्त, कस्य सर्वस्यापि सुखस्यान्तः परिसमाप्तिरन्तर्भावो यस्मिन् सः । तथाच यथा श्वा शुष्कास्थिचर्वणं कुर्वन् स्वदन्तनिःसृतरुधिरमास्थिसंबन्धि मन्यते तथा स्वरूपभूतं सुखं विषयसंबन्धि मत्वा तदर्थं वृथा खेदं प्राप्नुवन्तं त्वामालोच्यास्माकं खेदो भवतीति भावः ॥ ११ ॥

दिनपरिक्षये नीलकुन्तलै-
र्वनरुहाननं बिभ्रदावृतम् ॥
घनरजस्वलं दर्शयन्मुहु-
र्मनसि नः स्मरं वीर यच्छसि ॥ १२ ॥

भगवतस्त्वस्मदभाग्यवशात् करुणा नोत्पद्यते इत्याशयेनाहुः ॥ दिनेति ॥ दिनस्य परिक्षये संध्याकाले । परिक्षयपदेन दिने मद्द्वेषो ध्वनितः । दिनपरिक्षये आगत्य आयासीति भावः । प्रविष्टान्धकारकालेऽभ्यागतः कमलरूपमाननं नीलवर्णैः कुन्तलैरावृतं स-

भ्यगदृश्यमानं, तत्रापि, धनं गोधनवित्तयोरितिकोशाद्गोरजोव्याप्तम्। इतस्ततः प्रेक्षणेन पुनः पुनर्दर्शयन्नपि नो मनसि स्मरं काममेव यच्छसि, न त्वङ्गतङ्गम्। तत्रापि कामबाणैर्वर्धयन् वीरत्वमेव प्रकटयसीति संबोधनाशयः॥ अनभिज्ञापक्षे, त्वं तु संयोगसमयेऽप्यस्मद्दुःखायैव यतस इत्याशयेनाहुः॥ दिनस्य विरहनिमित्तत्वात् परमशत्रोः परिक्षये सम्यङ्नाशे सायंकाले। अनेनोद्दीपनकाल उक्तः। भ्रमरकुलमालावृतजलजवन्नीलकुन्तलावृतं मुखम् इत्यालम्बनस्य सौन्दर्यातिशयो व्यज्यते। तत्रापि धनरजस्वलमिति गोपोचितवेषेणोद्दीपनम्। तादृशं मुखं सर्वतो व्यावर्तनेन पुनः पुनर्दर्शयन्। तेन स्वापेक्षां सूचयन् नो मनसि स्मरं स्मरणमात्रेणापि क्षोभकरं बलाद्यच्छसि अर्पयसि। हे वीर अत्रैव त्वं वीरो, न तु कामयुद्धेऽत एव सर्वदा स्मरमेव यच्छसि, न त्वङ्गसङ्गमिति तव सर्वं सकपटमेव चेष्टितमस्माकं तु तत्सकलं प्रेममयमिति भावः॥ मानिनीपक्षे, यथा दयां विहाय स्वाङ्गेषु त्वया चेष्टितं तथाऽस्मास्वपीत्याहुः॥ दिनेति॥ तथाभूतं मुखं मुहुर्दर्शयन्नो मनसि स्मरं यच्छसि। तथाचास्मान् कामयुद्धाय बलात्कारणोद्योज्य सम्प्रति तद्युद्धावसरे पलाय्य गतोऽसीति दृष्टं तव वीरत्वमित्याशयेन संबोधयन्ति॥ हे वीरेति॥

निवृत्तिपक्षे, तथा दिनस्य तत्स्थानीयस्य विवेकस्य परिक्षये वनरुहस्य यथोक्तपद्मस्याननं सत्तास्फूर्तिप्रदचैतन्यं नीलकुन्तलस्थानीयैः घटपटादिप्रत्ययैरावृतं बिभ्रत्। तथा धनरजस्वलं वित्ताद्यर्थं विक्षेपोत्पादकेन रजोगुणेनावृतं पुनः पुनस्तत्तज्जन्मसु दर्शयन्नोऽस्माकं मनसि स्मरमग्निं यच्छसि। स्मेत्याश्चर्ये। यतस्त्वं वीरः अविवेकादिसमस्तशत्रुपराजये समर्थ इत्याशयेन संबोधयन्ति॥ हे वीरेति॥ १२॥

ननु यद्यहं करुणारहितस्तर्ह्यलं मया युष्माकमिति तत्कोपमाशङ्क्य, हे भगवन्न वयं त्वयि दोषमारोपयामः, किन्तु स्वमन्दभाग्यं वर्णयामः । इतस्तव संगमप्रतिबन्धकदोषनिरासायेत्थं प्रार्थयाम इत्याशयेनाहुः ।

प्रणतकामदं पद्मजार्चितं
धरणिमण्डनं ध्येयमापदि ॥
चरणपङ्कजं शंतमं च ते
रमण नः स्तनेष्वर्पयाधिहन् ॥ १३ ॥

प्रणतेति ॥ ते तव चरणकमलं नः स्तनेष्वर्पय । यद्यपि त्वदीयं चरणसरोजमन्तर्हृदयेऽस्माभिः स्थापयितुमिषितं, तथापि तत् तत्र स्थापयितुमशक्यमतस्तत्र त्वमेव स्थापय । चरणस्यापि षड्विधैश्वर्य्यसंपन्नत्वात्तत्स्थापनेनास्माकं सर्वप्रयोजनं सेत्स्यतीत्याशयेन तत्त्वप्रतिपादकानि विशेषणानि । तत्र प्रकर्षेण नतानामनन्यशरणानां कामप्रदमभिलषितसमस्तैश्वर्य्यप्रदं पदपद्मं तत् स्वबुद्ध्या ग्रहीतुमशक्यमतः प्रणतेत्युक्तम् । पद्मजेन ब्रह्मणा पद्मजया लक्ष्म्या च अर्चितमिति धर्माधारतोक्ता । तथा धरण्या मण्डनमलङ्करणरूपमनेन यशोऽधिकरणता निरूपिता । तथा आपदि ध्येयं श्रीप्रदानेनापन्निवर्त्तकमिति श्रियोऽधिकरणता कथिता । शंतमं कल्याणतममिति वैराग्यज्ञानाश्रयता दर्शिता । ततश्च हृदयस्थं कामाधिं नाशयेति ध्वनयन्त्यः सम्बोधयन्ति ॥ हे आधिहन्निति ॥ तन्निवृत्तिरपि नेतावता, किन्तु रमणे कृत इत्याशयेनाहुः ॥ हे रमणेति ॥ एवञ्चान्येषां तत्तत्फलप्रदमप्यस्माकं यथोक्तफलमात्रप्रदमस्त्विति भावः । यद्वा, चरणपङ्कजमस्माकं स्तनेषु अर्पय । एतावतैवास्माकं मनोरथपूर्तिर्भविष्यति । तस्य सर्वफलप्रदत्वादित्याशयेन

आहुः ॥ प्रणतेति ॥ एवं ब्रह्मलक्ष्म्यादिभिरपि तदेवार्चितम् । किञ्च धरणिमण्डनमतोऽस्मत्स्तनमण्डनं कथं न भविष्यतीति भावः । किञ्च ध्यानमात्रेणापन्निवर्तकं, स्पर्शेन त्वापल्लेशोऽपि न तिष्ठतीति भावः । किञ्च, शंतमं मोक्षपर्यन्तशान्तिसम्पादकम् । ततश्च तत्स्पर्शेनास्माकं मोक्षोऽपि नालभ्य इति भावः । नचास्ति भगवतोऽस्माकं चानेन कश्चिद्दोष इत्याशयेनाहुः ॥ हे रमणेति ॥ किञ्च समस्ताधिनाशाय कृतावतारस्य तत्रावश्यं स्वीयानामस्माकमाधिनाशः कर्तव्य इत्याशयेनाहुः ॥ हे आधिहन्निति ॥

अनभिज्ञापक्षे, अतः संप्रति कपटं विहायैवं कुर्विति प्रार्थनामावेदयन्ति ॥ प्रेति ॥ प्रणतानां नाग—तत्पत्न्यादीनां कामप्रदं सर्वार्थप्रदम् । अत एव वत्साहरणान्ते पद्मजेनार्चितम् । धरणिध्वजादिचिह्नैर्मण्डयतीति तथा । अनेन कृपालुत्वं सौन्दर्यातिशयवत्त्वं च दर्शितम् । तथाऽऽपदि ध्येयं महेन्द्रकृतवातवर्षाद्यापन्निवर्तकत्वेनानुभूतम् । एवं सुखसाधनत्वमभिधाय सुखरूपत्वमाहुः ॥ शंतममिति ॥ एतावताप्यस्मदाधिनाशे तव किं छिद्यते इत्याशयेन आहुः ॥ हे आधिहन् ॥ तत्र तदर्पणयोग्यश्च त्वमित्याशयेनाहुः ॥ हे रमणेति ॥ यद्वा तेन तत्रापि सुखमेव भविष्यत्यतो न वयम् । आयासकरे कर्मणि त्वां प्रेरयामः, त्वं तु स्वार्थाविरुद्धमप्यस्मत्प्रयोजनं न सम्पादयस्यत्यन्तमाश्चर्यमिति ध्वनयन्त्यः सम्बोधयन्ति ॥ हे रमणेति ॥ मानिनीपक्षे, ननु युष्मद्दर्शनान्मम मनसि कामोद्दीपने तच्छान्त्युपायः को वा भवतीभिर्विचार्य्याङ्गीकृत इतिचेत्तत्राहुः ॥ चरणपङ्कजं स्वीयं नस्तनेष्वर्पय । तेन च स्वकीयाधिं नाशयेत्याशयेनाहुः ॥ हे आर्तिहन् ॥ यत एतावतैव रतिसुखमवाप्स्यसीत्याशयेनाहुः ॥ हे रमणेति ॥ नचैतावताऽस्माकं मानहानिस्तव पादपद्मस्य सर्वकामप्रदत्वात् सर्वैरादृतत्वाच्चेत्याशयेनाहुः ॥ प्रणतेत्यादि ॥

निवृत्तिपक्षे, तस्मात्स्वात्मत्वेनाभिमतस्य जीवात्मनो यथोक्त-संसृतिप्रवाहोपशमार्थं स्वचरणसरोजं नस्तनेषु कर्मोपासनापरभागेषु अर्पय । ते तादृशवेदभागा भगवच्चरणारविन्दार्चनध्यानपरा इत्यधिकारिचेतस्याविर्भावय । ततश्च तदर्चनध्यानपरस्य तस्य सर्वं सेत्स्यतीत्याशयेनाहुः ॥ प्रणतेति ॥ अत एव ब्रह्मादिभिरर्चितम् । भक्तपारवश्यमाह ॥ धरणीति ॥ स्वीकृतरामकृष्णाद्यवतारस्य तव आपदि गजेन्द्रादिभिर्ध्येयं शतमम् आराधितं ज्ञानोदयद्वारा मोक्षसुख प्रदं जीवरूपेण संसरणमीश्वररूपेण नित्यमुक्ततयाऽवस्थानमाराधकभावश्चेत्येतत्सर्वं तव लीलामात्रं, न तु वस्तुत इत्याशयेनाहुः ॥ हे रमणेति ॥ १३ ॥

इदं तु स्वदोषनिवृत्त्यर्थमस्माभिः प्रार्थितं, त्वं प्रसन्नश्चेत्तर्हि मुख्यमस्मदीयं प्रार्थनीयं शृण्वित्याशयेनाहुः ॥

सुरतवर्द्धनं शोकनाशनं
स्वरितवेणुना सुष्ठु चुम्बितम् ॥
इतररागविस्मारणं नृणां
वितर वीर नस्तेऽधराऽमृतम् ॥ १४ ॥

सुरतेति ॥ हे वीर, स्वस्याधरामृतं वितर देहि । नन्वनेन किं भविष्यतीतिचेत्तत्राहुः ॥ सुरतेति ॥ यथा बह्वन्नभोजनानुकूला क्षुत् तत्करेण रसनोद्बोध्यते तथाऽपरिच्छिन्नकामेन त्वया संभोगयोग्यतासिद्ध्यर्थं परिच्छिन्नस्यास्मत्कामस्य वर्द्धनम् । तत्रापि न लौकिकसाम्यमित्याशयेनाहुः ॥ शोकस्य नाशनं मोक्षप्रदमपि । लौकिकं नैवं, तस्य प्रत्युत शोकोत्पादकत्वात् । किञ्च स्वरितेन नादितेन वेणुना सुष्ठु चुम्बितं परमभक्तेन वेणुना लोकोत्तरमाहात्म्य-

वश्वेन गीतं, ब्रह्मलोकपर्य्यन्तं ख्यातकीर्त्तीति यावत् । अत एव नृणामपि इतरेषु सार्वभौमादिसुखेषु रागमिच्छां विस्मारयति विलाययति तथा तत् । किमुत वक्तव्यमस्माकमतो तदेवास्माकमपेक्षितत्वादवश्यं देहीत्यर्थः । यद्यपीदमनल्पं वस्तु तथापि दानशूराणां किमप्यदेयं न भवतीत्याशयेन संबोधयन्ति ॥ वीरेति ॥ यद्वा नृणां स्वरितवेणुना चुम्बितं सत् तच्छिद्रद्वाराऽऽनन्दरूपेण निःसृत्वं स्वस्य कर्णद्वारा हृदये प्रविष्टं सत् इतररागविस्मारणे स्वरितवेणुरूपेण परिणतेनान्तःकरणेन चुम्बितं सदिति वाऽस्माकं तु साक्षात्तद्ग्रहणेऽधिकारात् साक्षादेव हि । यतः साक्षादेव पीतं सद् अस्माकं सुरतवर्द्धनं शोकनाशनं च भविष्यतीत्यर्थः ॥ अनभिज्ञापक्षे, हे वीर, यदि त्वं समरयुद्धकातरस्तर्हि स्तनेषु चरणाम्बुजमर्पय । यदि च सुरतसमरप्रतिभटप्रियजनविजयसमर्थस्तर्ह्यधराऽमृतं देहीति भावः । ननु दत्तमेव पूर्वं, किमिति पुनस्तदेव प्रार्थ्यत इत्याशङ्क्योक्तं— सुरतस्य प्रेममयस्य भोगेच्छां वर्द्धयतीति तत् अनेन तस्य मध्वादिवन्मादकता, तत्र तस्य भावश्च दर्शितः । अत एव त्वद्विरहादिजनितशोकस्य नाशनं, तत्रापि स्वरितवेणुना सुष्ठु चुम्बितं नादाऽमृतवासितमिति भावः । ननु लोकयशोनाशनिबन्धनशोकोत्पादकत्वात् कथं सर्वथा शोकनाशनमित्युक्तमित्याशङ्क्योक्तम्— इतरेषु लोकद्वयभोग्येषु रागं विस्मारयतीति । एवञ्च निमित्तापाये नैमित्तिकस्याप्यपाय इति भावः । तत्रापि नृणाम् । अनधिकारिणामपि यथा राहोः सुरादिरागविस्मारकम् अमृतं जातं तद्वत् । किमुत नारीणां तत्राप्यस्माकमिति भावः । यद्वा नृणां मध्ये तव यदेवंविधमधराऽमृतं तन्नो देहीत्यर्थः ॥

मानिनीपक्षे, ननु नैतावता ममान्तःकरणनिष्ठदाहस्य निवृत्तिर्भविष्यतीत्यतोऽन्यदपि किञ्चित् तदुपशामकं कर्म ज्ञायतामिति प्रार्थयन्त-

मित्यालक्ष्य विरहव्याकुलत्वादीषत्तिरोहितस्वभावाः सर्वमप्यनुजानन्ति ॥ सुरतेति ॥ नोऽस्माकमधराऽमृतं ते तुभ्यं स्वस्मै वितर देहि तेन तव मनोरथपूर्तिर्भविष्यति । यतः सुरतवर्द्धनं शोकस्याऽस्मदप्राप्तिहेतुकस्य नाशनम् । अनुभूतपूर्वत्वादत्र संशयो न कर्तव्य इत्याशयेनाहुः ॥ स्वरितो वेणुर्यस्य तेन त्वया पूर्वं सुष्ठुचुम्बितम् । किञ्चेदममृतं वागगोचरमात्रानुभूतमाहात्म्यमित्याहुः ॥ इतरेषां सर्वेषामपि नृणां योषिदधरामृतमितरागविस्मारकत्वेन प्रसिद्धम् । असुराणां मोहिन्यधराऽमृतपानाऽऽशया क्षीरोदमथनोत्थाऽमृतविषयकरागस्य त्यक्तत्वादिति भावः । तथापि यथोक्ताऽमृतास्वादनसमये प्रायो नायकस्य पराजयो भवत्यतस्त्वया तदा नो वीरता विधेया, नो चेदुपहास्यो भविष्यसीति हितैषित्वात् प्रथममेव त्वां सूचयाम इत्याशयेन संबोधयन्ति ॥ हे वीरेति ॥

निवृत्तिपक्षे, ततश्च भवदर्चनध्यानाभ्यां येषामन्तःकरणं शुद्धिमैकाग्र्यं च प्राप्तं तेषां विवेकवैराग्यादिसाधनसंपन्नानामधिकारिणां नृणां धारयत्यज्ञानादिकं सर्वमिति धरः सर्वाधिष्ठानभूतपरमात्मा तस्य सम्बोधनं, हे धर । ते नः, यथोक्तस्य तव प्रतिपादिकानामस्माकमुपनिषदाममृतम् । अस्मच्छ्रवणजन्यं ज्ञानाऽमृतं वितर करुणया देहि । यतस्त्वमेव वीरः, न हि ज्ञानेन सदृशं पवित्रमिह विद्यते * इत्युक्तत्वात् सर्वोत्तमज्ञानाऽमृतदातृत्वात्तद्दानशूरस्तदन्तःकरणवृत्त्यारूढः सन्, तदज्ञानादिसमस्तशत्रुध्वंसकरत्वाद्युद्धशूरश्चेद्, ददामि बुद्धियोगं तं येन मामुपयान्ति ते, तेषामेवानुकम्पार्थमित्यादि ध्वनयन्त्यः, हे वीरेति ॥ न च स्वस्य त्वदभिन्नज्ञानवतस्त्वत्प्रतिनिवृत्तिः शङ्क्या । प्रियो हि ज्ञानिनोऽत्यर्थमित्याशयेनाहुः ॥ सुरतस्य परस्परप्रीतेर्वर्द्धनम् । न चैतदमृतं विना जीवस्य शोकनिवृत्तिः सम्भवतीत्याशयेनाहुः ॥ शोकस्य तदुप-

लक्षितबन्धस्य नाशनम् । तरति शोकमात्मवित्, ब्रह्मविदाप्नोति परं, तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यते इति श्रुतेः । नचैतदस्मद्विचारमन्तरा लभ्यमित्याशयेनाहुः ॥ स्वरितो ध्वनिव्यञ्जितो वेणुस्थानीय उपनिषत्कदम्बो येन तेन वेदान्ताभ्यासवता पुरुषेण सुष्ठु चुम्बितं सम्यगास्वादितम् । वेदान्तविज्ञानसुनिश्चितार्था इत्यादिश्रुतेः । अनात्मपदार्थेषु राग एवानर्थकरः । स च मिथ्याज्ञानाविजृम्भितस्तत्त्वज्ञानाऽमृतेन मिथ्याज्ञाननिवृत्त्या निवर्त्तते इत्याहुरितरत्रानात्मपदार्थेषु यो रागस्तस्य नाशकम् । यं लब्ध्वा चापरं लाभमित्युक्तत्वात् ॥ १४ ॥

अटति यद्भवानह्नि काननं
त्रुटिर्युगायते त्वामपश्यताम् ॥
कुटिलकुन्तलं श्रीमुखं च ते
जड उदीक्षतां पक्ष्मकृद् दृशाम् ॥ १५ ॥

अहो अधराऽमृतायोग्यकालेऽपि त्वद्विरहोऽस्माकमसह्यः, किमु वक्तव्यमस्यां रात्रावित्याशयेनाहुः ॥ अटतीति ॥ भवान् स्वतन्त्रो वारयितुमशक्यो यदा दिने दिने काननं वृन्दावनं प्रति अटति गच्छति तदा त्रुटिः क्षणस्य कश्चिदंशोऽपि त्वामपश्यतां व्रजस्थानां सर्वप्राणिनां युगवत् प्रतीयते, किमु वक्तव्यमस्माकम् । पुनश्च कथञ्चिद्दिनस्य परिक्षये व्रजं प्रत्यागतस्य तव कुटिलकुन्तलाननं श्रीमुखमुच्चैरीक्षमाणानां प्राणिनां दृशां पक्ष्मकृद् ब्रह्मा जडो मन्दः । भवच्छ्रीमुखापेक्षयाति क्षुद्रसुखविषयदर्शनार्थं देवानां पक्ष्म न कृतवान् ! अलौकिकविषयदर्शनपराणामस्मदादीनां तु तत् कृतवान् । कालं च महान्तं कृतवानतस्तस्य जडत्वं स्पष्टमेवेति भावः

तथाच निमेषप्रतिबन्धोऽपि यत्रासह्यदुःखप्रदस्तत्रैवंविधसमये बहुकालं त्वद्विरहं कथं सहामस्तस्मात् कृपां कुर्विस्याशयः ॥ अनभिज्ञापक्षे, किञ्च प्रत्यहं क्षणमपि त्वददर्शने दुःखं, दर्शने च सुखमनुभूय सर्वसङ्गपरित्यागेन यतय इव त्वामुपगताः, त्वं त्वेवंविधा अप्यस्मान् परित्यज्य गत इत्यहो कष्टमिति सकरुणमाहुः ॥ अटतीति ॥ त्वामपश्यतां त्रुटिरपि युगायते, त्वं तु सूर्योदयादारभ्य तदस्तपर्य्यन्तं वनमटति। तत्रापि तत्र गमनं यदा सार्थकं भवेत्तर्हि स्याद्यथाकथञ्चित्सन्तोषः। परन्तु दिनमात्रं वृथा काननमेवाटति, अस्माकं तु तदत्यन्तमसह्यमिति भावः । दर्शनसमये निमेषमात्रमप्यन्तरमसह्यमिति दर्शनसुखमुक्तम् । उदीक्षतां मध्ये यः पक्ष्मच्छेदकः स एवाऽजडः प्रतिबन्धकनिवर्तकत्वात् कुशल इति वा। तथाच तत्प्रतिबन्धकस्याङ्गस्यापि छेदनीयत्वात् तत्सुखस्योत्कर्ष इति भावः । यद्वा अस्माकमयं सुखजनक इति भ्रमाद्वयं दुःखसमुद्रे पतिताः, विचारे कृते दुःखजनकत्वमेव सिद्ध्यति । सर्वदा तथैव तव प्रवृत्तिदर्शनादित्याशयेनाहुः ॥ अटतीति ॥ तथाच प्रयोजनं विना चिरकालं वने भ्रमणं दर्शनकाले कुटिलकुन्तलैर्मुखस्याच्छादनं चेत्येतत्सर्वं केवलमस्मद्दुःखायेत्यर्थः । किञ्च तवैव कोऽपराधो, दैवमप्यस्मद्दुःखाय बद्धपरिकरमित्याहुः ॥ पक्ष्मकृदिति ॥ तस्माद् बहु जातमितः परं करुणा विधेयेति भावः ॥ मानिनीपक्षे, ननु सम्प्रतीषद्गर्वशैथिल्यं जातं वर्तते, प्रकटिते तु मयि पुनर्गर्वगिरिशृङ्गारूढा भविष्यथ इतिचेदस्मदर्थं नागम्यतां, यासां तु त्वदर्शनादर्शनयोः सुखदुःखसागरप्रवेशस्तदर्थमेवागम्यतामित्याशयेनाहुः ॥ अटतीति॥

निवृत्तिपक्षे, यथोक्तज्ञानाऽमृतरहितानां क्षणमात्रमपि कालो दुःखकालत्वान्महानित्याहुः ॥ अटतीति ॥ त्वामपश्यतामाहि अविद्यालक्षणे दिने संसृतिलक्षणं यत् काननं तुद्भवान् यदटति तत्र त्र-

टिरपि कालो युगवद् भवति। मुखं निःसरणे वक्त्र इति कोशात् श्रियो धर्मादिसम्पत्तेर्निःसरणं यस्मात् तथाभूतं चेतनं, कुटिलः कुन्तलो जवो विषयाभिमुखो वेगो यस्य तादृशमुदीक्षतां मध्ये यस्तुभ्यं त्वत्प्राप्त्यर्थं दृशां चक्षुराद्यानां पक्ष्मकृन्निरोधकः स एव अजडश्चेतनस्त्वत्स्वरूप इत्यर्थः ॥ १५ ॥

पतिसुतान्वयभ्रातृबान्धवा-
नतिविलङ्घ्यतेऽन्त्यच्युताऽऽगताः ॥
गतिविदस्तवोद्गीतमोहिताः
कितव योषितः कस्त्यजेन्निशि ॥ १६ ॥

किञ्च, सर्वथा अत्याज्या अस्मान् किमर्थं त्यक्तवानसीति न विद्म इत्याशयेनाहुः ॥ पतीति ॥ हे अच्युत भगवतोऽप्रच्युतस्वरूप यत् कदापि तेन वियोगो न भविष्यतीति विचार्य्य पतयः सुताः अन्वयो वंशः भ्रातरः बान्धवाः संबन्धिन एते सर्वथाऽप्यलङ्घ्यास्ता-नप्यतिलङ्घ्य तवान्ति समीप आगताः। यतस्त्वं गतिवित् कर्म्मोपा-सनज्ञानफलज्ञाता तत्प्रदानाय साक्षाद्द्रष्टा। सर्वा अपि गतयो भगवत एव भवन्तीति। वयं वा गतिविदः। पत्यादिभजने भगवद्भजने च गतितारतम्यविद इति वा। किञ्च, त्वयाप्याकृष्टा इत्याहुः ॥ त-वोद्गीतेनोच्चैर्गीतेन मोहिताः पत्यादिवैमुख्यापादकेन गिताऽमृतेन त्वयैव स्वस्मिन्नासक्तचित्ताः संपादिताः कस्त्यजेत्। यस्त्वं स्व-स्मिन्नासक्ताः स्वयमाहूय फलमदत्वा त्यक्तवान् स भगवान् क इति न विद्म इत्यर्थः। ननु स्वपत्यादिसन्निधावेवेतः परं गन्तव्यमिति चेत् तत्राहुः ॥ कितवानां त्वत्स्वरूपानाभिज्ञत्वात् स्वपरवञ्चका-नां संबन्धिन्यः स्त्रियः। अतस्तदाभिमुख्यं कदापि मास्तु, त्वदेक-

शरणा वयं त्वयैव रक्षणीया इति भावः । अनभिज्ञापक्षे, आस्तां तव, अत्र तु अत्यन्तमनुचितं कृतमित्याहुः ॥ पत्यादीनातिक्रम्य तव समीपमागताः. यतस्तवोत्कृष्टेनोच्चैर्गीतेन मोहिताः । यतस्त्वं गतिविदः । अस्मन्मोहकान् गीतगतिविशेषाञ्जानतः । उद्गीतेन मोहिता अवश्यमागमिष्यन्तीत्यस्माकं गतिविद इति वा । यद्वा तव गतिं स्वभावं जानन्त्यो विदग्धा अपि वयं मोहनमन्त्रात्मकेन उद्गानेन मोहिता एव स्वयमेवाहूता योषितो निशि अरण्ये त्वाम् ऋते कस्त्यजेत् । क्वापि स्त्रियो न त्याज्यास्तत्रापि निर्जनवने, तत्रापि निशि, तत्रापि यदर्थमाहूतास्तदद्त्त्वैवेति तवैव शठस्यैवंविधं चेष्टितं सम्भवति, नान्यस्येति कितवेति संबोधनाशयः । यद्वा, हे कितव एवंविधः कितवोऽपि कश्चिन्नास्ति । स हि कैतवाल्लब्धं वस्तु स्वीकरोति, न तु तिरस्करोतीति भावः । तथाच नास्त्यस्मत्त्यागे किमपि कारणम् । मच्युतिलक्षणं तु तव त्वयि नास्त्येवेत्यच्युतेति संबोधनाशयः ॥ मानिनीपक्षे, तिष्ठत्वस्मदर्थं गमनागमनाविचारः एतास्तु पत्यादीनातिलङ्घ्य तव समीपमुपागताः किमर्थं त्यक्त्वा-नमीत्याहुः ॥ पतीति ॥ च्युतिरहितं मत्वा समागतास्त्वं तु स्वयमेव पलायित इत्याश्चर्यमिति अच्युतेति संबोधनाशयः । शठं प्रति शठं कुर्यादिति न्यायमजानन् वृथैव कितवः संपन्नोऽसि । सरलाः प्रति कैतव्याचरणादित्याशयेनाहुः ॥ हे कितवेति ॥

निवृत्तिपक्षे, एवंविधाधिकारिणमपेक्ष्यैव पत्यादिस्थानीयानर्थान् वादिनो वाऽतिविलङ्घ्य, हे अच्युत, स्वरूपावबोधिका यास्तवोद्गीतेन—समन्वयात्. स विजिज्ञासितव्यः, सोऽन्वेष्टव्य इत्यादिरूपेण, मायै=विवेकज्ञानाय तत्प्रदत्त्वेनोहिताः, कितवेन कैतव्येन व्याजेन योषितः स्वाभीष्टपतिपरायणा योषित इव परब्रह्मणि तात्पर्येण संगता अस्मान् को वा विद्वान्निशि कर्मादिरूपेण परि-

णतायामविद्यायां निशि त्यजेत् क्षिपेद्, ब्रह्मातिऽरिक्तपरत्वप्रतिपादनेनान्धगर्ते क्षपयेत् पातयेत् सजेत् स विद्वानित्यर्थः ॥ १६ ॥

रहसि संविदं हृच्छयोदयं
प्रहसिताननं प्रेमवीक्षणम् ॥
बृहदुरः श्रियो वीक्ष्य धाम ते
मुहुरतिस्पृहा मुह्यते मनः ॥ १७ ॥

ननु किमर्थं परमेश्वरबुद्धिमाच्छाद्य रमणबुद्धिं कृतवत्यो यथेदानीं दुःखसागरे निमग्नाः । अतस्त्यज्यतां सा बुद्धिरित्याशङ्क्य तव स्वरूपमेव तादृशबुद्धिमुत्पादितवान्, सा चेदानीमस्माभिर्निर्वर्तयितुमशक्येत्याशयेनाहुः ॥

रहसीति ॥ रहसि संविदः सङ्केता यस्मात् । अलुगार्षः । हृच्छयस्य कामस्योदयो येन । प्रहसितमाननं यस्य, प्रेमपूर्वकं वीक्षणं यस्य तथाभूतं त्वां श्रियः स्थानं तव बृहद्वक्षःस्थलं च पुनः पुनर्वीक्ष्यास्थितानामस्माकम् । अतिस्पृहा जाता तया चास्मन्मनस्तत्प्राप्त्यभवान्मुह्यते पुनः पुनर्वाञ्छां प्राप्नोतीत्यर्थः । यद्वा भावकिबन्तः स्पृहिस्तथाचाऽस्मन्मनो वीक्ष्य तया मुह्यतीत्यर्थः । अतिस्पृहमिति क्वचित् पाठः । यद्वा स्पृहोत्पत्तौ कारणत्रयं— रहसि संविद्रूपमेकं, कामोदयकरं प्रेमपूर्वकवीक्षणविशिष्टं प्रहसिताननमिति द्वितीयं, श्रियो धाम विशालमुरश्च तृतीयम् । तथाच त्वदीयं मोहिनीविग्रहमालोक्य दग्धकामो महारुद्रोऽपि यत्र मोहितस्तत्र ततोऽपि कोटिगुणितसौन्दर्यादिविशिष्टे त्वयि सति वराकीणामस्माकं व्यामोहे किं चित्रमिति भावः ॥ अनभिज्ञापक्षे, त्वद्दर्शनजन्यत्वदङ्गसङ्गस्पृहा त्वद्वियुक्तानामस्माकं रोगरूपा संपन्नाऽतः

स्वाङ्गसङ्गेन तच्चिकित्सा त्वयाऽवश्यं विधेयेत्याहुर्द्वाभ्याम् । पूर्वमस्माकं कामो न स्थितः । तव महसितयुक्तस्य मुखस्य दर्शनेन उदयं प्राप्तः, प्रेमपूर्वकं वीक्षणेन स्थिरतां गतः, ततो रहसि संविदा सम्भोगचातुर्यसूचनेनातिसौन्दर्य्यविशिष्टस्य विशालस्योरसो दर्शनाज्जातेन स्वयोग्यताज्ञानेन चोत्कण्ठा तच्छान्तिस्पृहोत्पन्ना। तद्विषयालाभात्तद्युक्तं मनः केवलं मुहर्मुहुर्मुह्यते, मृत्युरपि नायात्यत उभयभ्रष्टानां जीवनमरणान्यतररहितानाम् अस्माकं धिग् जीवनमित्यर्थः ॥ मानिनीपक्षे, यद्यपि भवान् सम्प्रति परोक्षस्तिष्ठति तथापि त्वदीयमनसोऽवस्थां वयं सम्यगवगच्छाम इत्याशयेनाहुः ॥ अस्मत्कृतं त्वत्तोषार्थं सङ्केतं तथा कामोदये हेतुभूतं प्रेमवीक्षणं, महसितयुक्तमस्मदीयं मुखं, श्रियः स्थानमुरःस्थलं च वीक्ष्य तत्प्राप्तिस्पृहया तव मनो मुह्यति तथाप्यस्मद्दुःखार्थं तादृशं दुःखमपि सहसे, न त्वागच्छस्यतः किं वक्तव्यमाश्चर्यं तव हृदयस्य माहात्म्यमिति भावः ॥

निवृत्तिपक्षे, यद्यप्येवं तथापि कामिनोऽस्मदभिप्रायं नाशयन्तीत्याहुः ॥ प्रमदाकृतां रहसि संविदं, तथा तदीयं यथोक्तमाननं यथोक्तमुरश्च वीक्ष्य कामरूपेण स्थितस्य तव जातया स्पृहया अस्माकं मनो मुह्यते तात्पर्य्यव्यसासं भजत इत्यर्थः ॥ १७ ॥

स्वदुःखनिवृत्तेरनायाससाध्यतामावेदयन्ति ॥

व्रजवनौकसां व्यक्तिरङ्ग ते
वृजिनहन्त्र्यलं विश्वमङ्गलम् ॥
त्यज मनाक् च नस्त्वत्स्पृहात्मनां
स्वजनहृद्रुजां यन्निषूदनम् ॥ १८ ॥

व्रजेति ॥ हे करुणानिधे तवाभिव्यक्तिः सर्वेषां व्रजौकसां वनौकसां च विशेषेणात्यर्थं वृजिनहन्त्री दुःखनिरसनी । अतो दुःखप्रदानायान्तर्धानमनुचितमिति भावः । यद्वा वृजिनस्य पापस्य नाशिका । तथाच स्वाङ्गसङ्गप्रतिबन्धकं पापमभिनाशयितुं समर्थस्यान्तर्धाने प्रयोजनं न पश्याम इति भावः । किञ्च, विश्वस्य सर्वस्याप्यर्थं मङ्गलरूपा । तथाच विशेषसम्बन्धवतीनामस्माकं संप्रति विपरीता सम्पन्नेत्यहोऽस्मद्भाग्यमहिमेति भावः । अतः स्वाभिव्यक्त्यनुरूपैव चेष्टा न्याय्येत्याशयेनाहुः ॥ नोऽस्माकं मनागीषदायासरहितत्यागं किञ्चित् त्यज। अस्मभ्यं हि अनादरेणापि त्वया कृतेऽस्मत्कार्यं भविष्यतीति ज्ञापयितुं त्यजेत्युक्तम् । यतस्त्वय्येव स्पृहायुक्त आत्मा अन्तःकरणं यासाम् । तथाचोत्कटस्पृहायुक्तान्तःकरणानामादरानादरविचारः कुतस्त्य इति भावः । किं त्याज्यमित्याकाङ्क्षायामाहुः ॥ स्वजनानां गोपीनां हृदयरोगाणां यदेवं नितरां सूदनं नाशनं भवति तदेव तदभिज्ञस्त्वं देहि, तन्नाम न वक्तव्यमिति भावः ॥ मनागिति याचकरीत्या । वस्तुतस्तु हृद्रुजामिति बहुवचनेन, निषूदनमित्यत्र निशब्देन च चिरकालं निरन्तरं च लोकोत्तराङ्गसङ्गसुखं प्रार्थनीयत्वेनाभिप्रेतं ध्वनितम् ॥

अनभिज्ञापक्षे, स्वरोगोपशामकौषधप्रदानोत्साहम् उत्पादयितुं याचकरीतिमनुसरन्त्यः स्तुवन्ति ॥ तव व्यक्तिर्जन्म वृजिनस्य दुःखस्य पापस्य च हन्त्री । अनेन सर्वदुर्गाणि यूयमञ्जस्तरिष्यथेति गर्गाचार्येणोक्तत्वात् पूतनादिसंहारेण नलकूबराद्युद्धारेण च तत्त्वस्यानुभूतत्वाच्च । किञ्च, नैतावदपि तु सर्वस्यापि मङ्गलरूपा । तव जन्मप्रभृति काप्यमङ्गलस्यादर्शनात् । एवं स्तुत्या स्वाभिमुखं प्रियमालक्ष्याहुः॥मनागीषत्, न तु बहु, तत्रावश्यं त्यक्तव्यमेव

देहि त्यज। किं तदित्यपेक्षावन्तमिवालक्ष्य भिक्षुपादप्रसारन्यायमाश्रित्याहुः ॥ स्वजनेति॥ तथाच केषाञ्चिद् दुःखस्य नाशकः, केषाञ्चिन्मङ्गलरूपफलविशेषस्य प्रदाता, अस्माकं तु रोगस्य निवर्तको भवान्न तत्र कार्पण्यं तवोचितमिति भावः॥ मानिनीपक्षे, जन्मप्रभृति यादृशस्तव स्वभावः स्थितः सम्प्रत्यपि तथाभूत एवास्माकमपेक्षित इत्याशयेनाहुः ॥ व्रजेति ॥ तथाच यथास्माकमपि दुःखं न भवेन्मङ्गलं च स्यात् तथात्वयानुष्ठेयमिति भावः । तर्हि कथमेवं भवेदितिचेत् तत्राहुः ॥ त्यजेति ॥ हे स्वजन, नोऽस्माकं यत् हृदयकान्तीनां निषूदनमीषदौदासीन्यं तत् त्यज यतस्त्वत्कर्तृका या स्पृहा तस्यामात्मा मनो यासां त्वत्कृतमानासक्तचेतसां तथाच संप्रति स्वीकृतमीषदौदासीन्यं विहायाऽऽगत्य पूर्ववत् प्रार्थनादिकं कुर्वित्याशयः ॥

निवृत्तिपक्षे, तस्माद् यथाऽस्मत्संरक्षणं जीवानां समुद्धारश्च भवेत् तथा त्वया कृपा विधेयेति प्रार्थयन्ते ॥ व्रजेति ॥ व्रजस्य वेदस्य संसारारण्यपतितानां जीवानां चात्, वृजिनहन्त्री सर्वाऽनर्थनिवृत्तिकरी । तथा विश्वस्यालं मङ्गलरूपा परमानन्दाविर्भावकरी हे परमात्मँस्तव व्यक्तिः साक्षात्कारः । तस्मात् स्वजनानां स्वभक्तानामज्ञानाहङ्कारादिलक्षणरोगाणां यन्निषूदनं तदस्मत्संबन्धिविज्ञानलक्षणं किंचित् स्वजनेभ्यो देहि । यतस्त्वाद्विषया याऽस्मज्जिज्ञासा तत्कर्तव्यतायामात्माभिप्रायो यासाम् । तथाचौपनिषदेन स्वविज्ञानेन स्वजनानुद्धरेति भावः ॥ १८ ॥

एवं बहूक्तेः परविरहव्याकुलस्वान्ता गतधैर्या रुदन्त्य आहुः।

यत्ते सुजातचरणाऽम्बुरुहं स्तनेषु
भीताः शनैः प्रिय दधीमहि कर्कशेषु ॥

तेनाटवीटमसि तद्व्यथते न किंस्वित्
कूर्पादिभिर्भ्रमति धीर्भवदायुषां नः ॥ १९ ॥

इति श्रीभागवते दशमस्कन्धे रासपञ्चाध्याय्या-
मेकत्रिंशोऽध्यायः ॥ ३१ ॥ (३) ॥

यदिति ॥ यत्तव सुजातं चरणकमलं स्तनेषु भीताः सत्यः शनैः दधीमहि भयेन शनैर्धारणे हेतुः–कर्कशेषु। नन्वेवं तर्हि किमर्थं धारयथेति चेत्तत्राहुः ॥ हे प्रिय, स्वसुखार्थं धार्ष्ट्येन धारयामः तत्रापि सुजाताम्बुरुहरूपत्वात सुगन्धि शीतलं हृदयस्थतापोपशामकम्। प्रियपदमितस्तद्धारणमिति सूचनार्थमुक्तम्– सुजातेति ॥ त्वं तु तादृशकोमलेनास्मान् परित्यज्यास्मद्द्वेषेण संप्रति रात्रौ अटवीं शर्करादिव्याप्तमरण्यमटसि भ्रमसि । किं स्वित् तत्पादपद्मं तत्रत्यशर्करादिभिर्न व्यथते । यद्यपि तेन तादृशवने भ्रमणेन तद् व्यथते, न वेति संदेहो भवति, तथा नास्माकं संदेहोऽस्मद्दोषवशात् पलायितेन त्वया तद्व्यथामगणयित्वा भ्रमणाश्रितत्वाद् व्यथत एवेति निश्चयात् । तथाच स्वसुखहेतुत्वात्तत्पीडापि यद्यस्माकमसह्या, तदा परमदुःखकारणभूता वनभ्रमणजनितव्यथा त्वसह्यतमाऽतोऽस्माकं बुद्धिस्तामनुसन्धाय भ्रमति घूर्णत इत्यर्थः। यतो भवदायुषां भवदेकप्राणानामस्माकं तादृशभवत्पादपीडानुसंधानेन मरणमेवोपस्थितमहो कष्टमिति भावः ॥ अनभिज्ञापक्षे, अहो यत् प्रार्थ्यते तन्मयाऽवगतं, तथापि मदीयं पादसरोजं युष्मत्स्तनेषु स्थापितं व्यथामवाप्नोति, तेषां कठोरत्वादतो भवतीनां परोक्षं वन एव भ्रमामीत्याशङ्क्य सरोदनमतिचित्रमाहुः ॥ यदिति॥ तथाच्चातिसुकुमारत्वात् पीडाशङ्कयाऽस्माभिः कठोरेषु स्तनेषु

शनैः शनैः स्थाप्यते, तेन त्वमटवीमटसीत्यतिचित्ररूपोऽन्यायस्तवैव शोभत इति भावः । स्तनस्पर्शजनितदुःखासहनं, कूर्प्पादिस्पर्शे व्यथासहनं च किन्निबन्धनमिति तु वयं न विद्म इत्यप्यनेन ध्वनितम् । तव मनसोऽवस्थां को वेद कीदृशो वर्ततेऽस्माकं बुद्धिस्तु संशयचक्रारूढा स्थैर्य्यं न लभते, किं कुर्म इत्याहुः ॥ तद् व्यथते परमसुकुमारत्वादाहो स्विन्न व्यथते, भ्रमणे प्रवृत्तत्वादिति द्वयोः पक्षयोरेकस्यानिर्धारणादस्मद्धीर्भ्रमति । तथाहि । अहो तस्य पदं तु व्यथते, तथाप्यसावस्मास्विव स्वाङ्गेष्वपि निर्दयः । किन्नाऽस्मद्दुःखार्थं स्वाङ्गे दुःखमुत्पाद्य सहते, किं वाऽस्मद्दुःखजन्यसुखेन दुःखमपि सुखमेव मन्यते, किं वा दैववशाद्विरहं प्राप्तः प्रेमभराक्रान्तस्वान्तत्वादुन्माददशां प्रविष्टस्तत्पीडां नानुसन्धत्त इत्यादिप्रथमपक्षानुकूलतर्कान् प्रति धावति । किं संसर्गजा दोषगुणा भवन्तीति न्यायाद्यथा हृदयमतिकोमलमप्यस्मत्कठोरकुचसङ्गेनातिकठोरमभून् तथा त्वत्पदाऽम्बुजमप्यतो न व्यथते । किं वा सुकुमारसङ्गेन कूर्पादयः कोमलतां गताः, किं वा भूमिरेव कारुण्यान्माधुर्यरसास्वादनाय वा तदधः स्वजिह्वां स्थापयति, किं वा कयाचिदिन्द्रजालविद्यया भूमिं स्पृशतीत्यादिद्वितीयपक्षे तर्कान् प्रति धावति । ननु मिथ्येदं, प्राणधारणादिति चेत्तत्राहुः ॥ भवत्येव समर्पितमायुर्यासामतः सुखिनि त्वयि स्थितत्वान्न नश्यतीति भावः ॥ मानिनीपक्षे, अतिकोमलचित्तस्य परमसुकुमारावयवस्य स्वभावविपर्य्ययमालक्ष्य वयमतिव्याकुलाः संपन्नाः, किं कुर्म इत्याशयेनाहुः ॥ यदिति ॥ कुचानां कठोरत्वाच्चरणस्यातिसुकुमारत्वाद्धारणे भीयसे इति कृत्वा तद्धारणम् । यतो हि प्रिय । तथाच तव संयोगोऽप्यस्माकं दुःखहेतुरेव, यतः कुचानां कठोरत्वे तव पादपीडाप्रयुक्तं दुःखं, व्रतादिना तत्कोमल-

त्वत्प्रार्थनायां तव दुःखानुसन्धानेन दुःखमिति भावः । तादृशेनापि त्वमटवीमटसि । तत्तु निश्चयेन व्यथत एव, तव तु तस्मिन्नपि दया नोत्पद्यतेऽतस्तवस्वभावविपर्ययमालक्ष्यास्मद्धीर्भ्रमतिमरणमूर्छां गन्तुं प्रवृत्ता, त्वं त्वस्मद्विरहितोऽवशिष्टास्मदायुर्भिरपि चिरं सुखेन न विहरसीत्याशयेनाहुः ॥ भवत्यर्पितासुषामिति ॥

निवृत्तिपक्षे, जीवरूपेण संसरणं तु नास्मभ्यं रोचतेऽतः पुनरपि वदाम इत्याशयेनाहुः ॥ यदिति ॥ तव परब्रह्मणो यत् साधकानुग्रहार्थं प्रकटितं सगुणं स्वरूपं सुजाते चरणाम्बुरुहं यस्य तदपि कठिनानुष्ठानप्रतिपादकेषु स्तनस्थानीयेषु कर्मोपासनाप्रतिपादकयागेषु, अहो निर्गुणस्य निरवयवस्य कथमर्चनादिकं प्रतिपादयाम इति भीताः सत्यः शनैः साधकचित्तशुद्ध्यादिक्रमेण तस्य ज्ञानोदयार्थं दधीमहि । तेनैव जीवत्वं प्राप्तेन रूपेण संसाराटवीमटसि तत् किंस्विन्न व्यथते ? किन्तु व्यथत एव । तत्रत्यैः कूर्पादिस्थानीयैराध्यात्मिकादिदुःखैः । यद्वा किं व्यथते न वेति अस्माकं धीर्भ्रमति । अनेन संसारस्यानिर्वचनीयत्वं बोधितम् । यतो भवद्बोधनार्थमेवास्माकं प्रादुर्भावोऽत एव वदाम इत्याहुः ॥ भवदिति ॥ १९ ॥

इति श्रीधनपतिसूरिविनिर्मितायां गूढार्थदीपिकायां एकत्रिंशोऽध्यायः ॥ ३१ ॥ (३) ॥

अथ द्वात्रिंशोऽध्यायः ॥

द्वात्रिंशे गोपिकाऽऽलापविक्लिन्नहृदयोऽच्युतः ॥
तासामाविर्हितस्ताश्च पूजितः प्रत्यपूजयत् ॥ १ ॥

इत्थं विरहव्याकुलचेतसां चेष्टावर्णनमुपसंहरति ॥

श्रीशुक उवाच ॥

इति गोप्यः प्रगायन्त्यः प्रलपन्त्यश्च चित्रधा ॥
रुरुदुः सुस्वरं राजन् कृष्णदर्शनलालसाः ॥ १ ॥

इतीति ॥ इत्येवं पूर्वोक्तप्रकारेण सर्वा एव गोप्यः प्रकर्षेण उच्चैः परमप्रेम्णा गायन्त्यः, तथा चित्रधा अनेकप्रकारेण प्रलपन्त्यः विरहव्याकुलत्वादनर्थकान्यपि वचांसि प्रयुञ्जन्त्यः । एवं कृतेऽपि यदा प्रेष्ठदर्शनं न जातं तदा सुस्वरं करुणोत्पादकदीर्घस्वरेण रोदनं कृतवत्यः । एतत् सर्वं न स्वदेहरक्षाद्यर्थं, किन्तु कृष्णदर्शने लालसा उत्कटोत्कण्ठा यासां ताः । यथा दुःखिता दुःखनिवृत्त्यर्थं राजाग्रे रोदनेन तान्निवेदयन्ति तद्वदिति सम्बोधनाशयः ॥

निवृत्तिपक्षे, गोप्यः श्रुतयो मुख्याधिकारिणं प्रति प्रकर्षेण मुख्यतात्पर्येण परमात्मानमेव गायन्त्यः कर्म प्रति प्रलपन्त्यः, अनर्थकवचनत्वेन प्रतिपद्यमानाः परमजडं प्रति रुरुदुः हा महामूर्खोऽयं सर्वथास्मद्विमुख इति रोदनमेव कुर्वन्त्यः ! अधिकार्यभाव उपदेशवाक्यानां रोदनरूपत्वाभिधानात् । यतः कृष्णस्य सदानन्दरूपस्य परमात्मनो दर्शनं जीवानां मोक्षार्थं भवत्विति लालसा यासां ताः । आत्मा वा अरे द्रष्टव्य इत्यादिश्रुतेरित्यर्थः ॥ १ ॥

ततः परं भगवानप्यन्तर्धानतया स्थातुं नाशकत्, किन्त्वति-

मबलेन तत्प्रेम्णा समाकृष्टचेता आविर्भूत इत्याह ॥

तासामाविरभूच्छौरिः स्मयमानमुखाऽम्बुजः ॥
पीताऽम्बरधरः स्रग्वी साक्षान्मन्मथमन्मथः ॥ २ ॥

तासामिति ॥ मया ततमिदं सर्वं जगदव्यक्तमूर्तिनेत्युक्तस्वरूपेण तावत्कालं स्थितः पुनस्तदभीष्टो वासुदेवात्मना आविर्भूतः । एवं दुःखनिवृत्त्यनुकूलं शौर्य्यं प्रकटनीयं, सर्वदुःखनिरासाय यदुवंशेऽवतीर्णत्वात् । स्वापराधशङ्कया ग्लायमानमानसास्तास्तोषयितुं स्मयमानं स्मितयुक्तं मुखपद्मं यस्य सः । तथाच भवतीनां विरहवैक्लव्यदर्शनार्थमहं तिरोहितो, न तु किञ्चिद्दोषं मनसि निधायातो यथोक्तवैक्लव्यमवलोक्यातिप्रसन्नोऽहमिति सूचयन्नित्यर्थः तत्तोषोत्पादकं तत्स्वरूपं चाह ॥ पीताम्बरधरः लक्ष्म्या सह रमणयोग्येन वैकुण्ठस्वरूपेण । अत एव स्रग्वी ब्रह्मणा लक्ष्म्या वा समर्पितया मालया अलङ्कृतः । तत्रापि केवलकरुणयैवाऽऽविर्भूतो, न तु कामकृताऽऽकर्षणेनेति बोधनायाह ॥ साक्षाद् यो मन्मथमन्मथस्तस्य चैवम्भूतस्य नास्ति कामवश्यतासम्भावनेति भावः ॥ अनभिज्ञापक्षे, दुःखितः शुकः, क्षत्रियजातित्वात्तासु प्रेमभराक्रान्तासु शौर्य्यं प्रकटितवानिति द्योतयितुं शौरिरित्युक्तवान् । अत एव दुःखितास्वपि तासु स्मयमानमुखाम्बुजस्तत्रापि यः कामाधिष्ठातृदेवस्तस्यापि मन्मथः स्वस्मिन्मनःसक्तिकरः । तद्दशासु हासानौचित्यमभिप्रेत्य हाससंकोचार्थं मुखाग्रे हस्तेन पीताम्बरधरः स्रग्वी वनमालया शोभमानः साक्षान्मन्मथमन्मथ इति ॥ तासां तादृशस्यापि विरहदुःखस्य विस्मरणार्थं तादृश इति भावः ॥ मानिनीपक्षे, शौरिरपि तत्प्रेमपराधीनत्वादाविरभूत् । स्मयमानमुखाम्बुजः । अहो हासार्थं मयेदमनुष्ठितमतः कामो न

विधेय इति सूचनार्थं तथाभूतः । अन्तस्तुष्यद्बहिर्विरहात् संतप्त एवे-ति भावः । अत एवापराधक्षमापनार्थं स्कन्धाभ्यां पुरोऽवलम्बिनीकृत्य बद्धहस्ताभ्यां पीताऽम्बरधरः । युष्मत्परिधापितामेव मालां धारयन् । युष्मान् स्मरन्नेव क्वचिदेकान्ते विकलितचित्त एवाहं स्थितो, न तु कयाचिद्रममाण इत्यम्लानपुष्पां मालामवलोक्य प्रतीयतामिति सू-चयन्निवेति भावः । ननु तथापि तासां कोपनिवृत्तिः कथं जातेत्या शङ्क्याह ॥ साक्षादिति ॥ २ ॥

ततः किं वृत्तमित्यपेक्षायामाह ।

तं विलोक्यागतं प्रेष्ठं प्रीत्युत्फुल्लदृशोऽबलाः ॥
उत्तस्थुर्युगपत् सर्वास्तन्वः प्राणमिवागतम् ॥ ३ ॥

तथाभूतमागतं विलोक्य तासां विह्वलतादशायामाविर्भूतत्वात् तच्छरीरसुगन्धाघ्राणादिना ससंज्ञाः सत्यः, अहो आगतोऽयं प्रेष्ठ इत्यमन्यन्तेति सूचयितुमागतमित्युक्तम् । प्रीत्या विकसितनेत्रप-द्माः प्रीतिप्राबल्यात् कोपनिवृत्त्या तादृशा जाता इति भावः । त-प्राप्यऽबलास्तत्प्रतीकारबलरहिता यदा विरहेण कृषतां गताः । बलरहिता अपि । यतः, प्रेष्ठम् ॥ तद्दर्शनमात्रेणागतबला इति भावः । सर्वा अपि युगपदेवोत्तस्थुः । आगतं प्राणं प्राप्य तन्वः करचरणादयः शरीरावयवा यथा । यद्वा, त्यक्तान्यनेकानि योगि-शरीराणि प्राणं प्राप्य यथा युगपदुत्तिष्ठन्ति तद्वत् । एक एव कृष्ण-स्तासां प्राण इति बोधनाय, प्राणमित्येकवचनम् ॥ ३ ॥

तत्र युगपदुत्थितानां सर्वासां मध्ये मुख्यानां पृथक्चेष्टिता-न्याहुः ।

काचित् कराऽम्बुजं शौरेर्जगृहेऽञ्जलिना मुदा ॥

काचिद्दधार तद्बाहुमंसे चन्दनभूषितम् ॥ ४ ॥

काचिदिति ॥ चन्द्रावली श्यामा शैव्या पद्मा राधा ललिता विशाखा भद्रेत्यष्टौ मुख्यसख्यः । तत्राद्याश्चतस्रः सरलस्वभावत्वा-द्दक्षिणाः । उत्तराश्चतस्रः वामस्वभावत्वान्मानिन्यः । अत एव मुनिनाऽपि सरलानां मध्य एकैकस्याश्चेष्टितमर्द्धेनोक्तम् । वामानां मध्ये त्वेकैकस्या एकैकवृत्तेनोक्तम् । तत्रादौ कान्तपराधीनाया दक्षिणाया वृत्तमाह ॥ काचिच्छौरेर्दक्षिणं करकमलम् अञ्जलिना संहतहस्तद्वयेन जग्राह । तत्रापि मुदा परमहर्षेण भ्रमणप्राप्तश्रमं म-त्वा स्पर्शौत्कण्ठ्यात् करावलम्बनव्याजेन प्रेम्णा तद्गृहीतवतीत्यर्थः। इयं तु राधाप्रतिस्पर्द्धिनी चन्द्रावलीसंज्ञा । तथाचोक्तं विल्वमङ्गले, राधामोहनमन्दिरादुपगतश्चन्द्रावलीमूचिवान् राधे क्षेममिहेति तस्य वचनं श्रुत्वाऽऽह चन्द्रावली * कं सक्षेममये विमुग्धहृदये कंमः क्व दृष्टस्त्वया राधा केति विलाज्जितो नतमुखः स्मेरो हरिः पातु व इति अथ द्वितीयायाः स्वाधीनकान्ताया दक्षिणायाश्चेष्टितमाह ॥ का-चिच्चन्दनलिप्तं विरहतापोपशामकं तस्य प्रेष्ठस्य बाहुं स्कन्धे मुदा दधार । इयं राधासुहृद्भूता श्यामलाख्या सखी ॥ ४ ॥

काचिदञ्जलिना गृह्णात् तन्वी ताम्बूलचर्वितम् ॥
एका तदङ्घ्रिकमलं संतप्ता स्तनयोरधात् ॥ ५ ॥

अथ तृतीयायाः कान्ताधीनाया दक्षिणाया वृत्तमाह ॥ का-चिच्छौरेस्ताम्बूलचर्वितं परमादरादञ्जलिना गृहीतवती, न त्वेकेन हस्तेन, यतस्तन्वी कोमलाङ्गी तथा तद्ग्रहणयोग्या इयं चन्द्रावली-सुहृद्भूता शैव्याभिधा सखी । अथैवंविधाया एव चतुर्थ्या वृत्तमाह ॥ एका तस्य वामभुजेन श्यामलाख्यां सखीमवलम्ब्य तिष्ठतः प्रेष्ठस्य

दक्षिणमङ्घ्रिसरोरुहं स्वयमुपविष्टा सती स्तनयोरधारयत् संतप्ता । इयमपि चन्द्रावलीसुहृद्भूता पद्माख्या सखी ॥ ५ ॥

अथ वामासु प्रथमाया अतिवामायाः प्रखरायाः स्वाधीनकान्ताया वृत्तमाह ।

एका भ्रुकुटिमाबध्य प्रेमसंरम्भविह्वला ॥
घ्नतीवैक्षत् कटाक्षेपैः संदष्टदशनच्छदा ॥ ६ ॥

एका भ्रुकुटिमाबद्ध्य भ्रुवौ कुटिलीकृत्य प्रेमसंरम्भेण प्रणयकोपावेशेन विह्वला सती संदष्टाधरोष्ठा भूत्वा, कटाः कटाक्षास्तैर्य आक्षेपाः परिभावास्तैस्ताडयन्तीवैक्षत । इष्टेऽपि गर्वमानाभ्यां बिब्बोकः स्यादनादरः*इत्युक्तलक्षणो बिब्बोकाख्योऽयमनुभावः । सर्वाः परित्यज्य या नीता पश्चात् त्यक्ता च । सेयं श्रीराधाख्या मुख्या सखी गोपालतापिन्यां गान्धर्वीति नाम्ना ख्याता ॥ ६ ॥

अथ द्वितीयायाः प्रखरायाः स्वाधीनकान्ताया वामाया वृत्तमाह ।

अपराऽनिमिषद्दृग्भ्यां जुषाणा तन्मुखाऽम्बुजम् ॥
आपीतमपि नातृप्यत् सन्तस्तच्चरणं यथा ॥ ७ ॥

अपरा अनिमिषद्दृग्भ्याम् अनिमीलिताभ्यां दृग्भ्याम् अलिस्थानापन्नाभ्यां तत्रापि क्षरणशङ्कया अनिमिषिताभ्यां तस्य प्रेष्ठस्य मुखाऽम्बुजं तत्रत्यलावण्यामृतम् आसमन्तात् पीतमपि जुषाणा अत्रैवागमनं करिष्यतीति मानवशात् स्वस्थान एव स्थित्वा सेवमाना नातृप्यत् उत्कण्ठातिशयादलंबुद्धिं न कृतवती । तत्रानुरूपदृष्टान्तमाह ॥ यथा ॥ ७ ॥

अथ तृतीयाया मृद्व्याः स्वाधीनकान्ताया वामायाश्चरितमाह ।

तं काचिन्नेत्ररन्ध्रेण हृदिकृत्य निमील्य च ॥
पुलकाङ्ग्युपगूह्यास्ते योगीवानन्दसंप्लुता॥८॥

तं प्रेष्ठं नेत्ररन्ध्रेण हृदिकृत्य हृदयं नीत्वा प्रवेशनीयरूपस्यै-कत्वाद्रन्ध्रेणेत्येकवचनम् । तन्निःसरणभयान्नेत्रे निमील्य च तं-मन्तरेवालिङ्ग्य तज्जन्यानन्दमग्ना पुलकाङ्गी रोमाञ्चिततनुरास्ते । अत्रैवागत्यालिङ्गनं विधास्यामीति माननैवम्भूता सती स्वस्थान एव स्थिता । यथाऽऽविर्भूतानन्दे निमग्नो योगी समाधावास्ते तद्वदित्यर्थः । इयमपि राधासुहृद्भूता विशाखाऽभिधा सखी । एवं सत्याऽत्राभिहिता, अष्टमी तु सरला भद्राख्या विष्णुपुराणेऽभि-ता । काचिदायातमालोक्य गोविन्दमतिहर्षिता * कृष्ण कृष्णेति कृष्णेति प्राह नान्यदुदैरयदिति । चन्द्रावल्यादिनामानि तु स्कान्द-प्रह्लादसंहिताद्वारकामाहात्म्यादावुक्तानि ॥ ८ ॥

अथान्यासां वृत्तमाह ।

सर्वास्ताः केशवालोकपरमोत्सवनिर्वृताः ॥
जहुर्विरहजं तापं प्राज्ञं प्राप्य यथा जनाः ॥ ९ ॥

सर्वास्ता गोप्यः केशवस्य ब्रह्माद्यनुकम्पकस्य तेजोनिधेरव-लोकनाद् यः परमोत्सवस्तेन निर्वृता आनन्दिताः, विरहजन्यं तापं जहुः । यथा प्राज्ञं परमेश्वरं प्राप्य तदीया जनाः । यद्वा प्रा-ज्ञं ब्रह्मज्ञं प्राप्य मोक्षविरहजं तापं मुमुक्षवस्त्यजन्ति । यद्वा प्राज्ञं सौषुप्तं पुरुषं प्राप्य विश्वतैजसावस्था जीवाः ॥ ९ ॥

एवम्भूताभिस्ताभिर्भगवानपि विशेषेण शुशुभ इत्याह ।

ताभिर्विधूतशोकाभिर्भगवानच्युतो वृतः ॥
व्यरोचताधिकं तात पुरुषः शक्तिभिर्यथा ॥१०॥

ताभिरिति ॥ भगवान् षड्विधैश्वर्यसंपन्नोऽपि अच्युतः स्व-स्वरूपादानन्दघनादप्रच्युतोऽपि विधूतशोकाभिस्ताभिरधिकं तत्रापि विशेषणारोचत पुरुषः स्वयमेव परमात्मा सत्त्वादिभिः शक्तिभि-र्यथा । यद्वा उपासको ज्ञानबलवीर्यादिभिर्यथा।अथवा पुरुषः सङ्घा-ताभिमानी सर्वेन्द्रियशक्तिभिर्यथा तथा स्वस्वरूपानतिरिक्ताभिः स्वशक्तिरूपाभिः । याभिर्गोपाङ्गनाभिर्भगवतः क्रीडानुकरणं संवृ-त्तमिति भावः । पुत्रवदनुकम्प्यत्वात् तत्राग्रे मयेदं रहस्यं प्रकाशि-तमिति तातसंबोधनाशयः । प्रमदाशतकोटिभिराकुलित इत्यागमो-क्तसंख्याना गोप्यस्तासां मध्ये, षोडशैव सहस्राणि गोप्यस्तत्र समागताः ॥ चन्द्ररूपी मतः कृष्णः कलारूपास्तु ता मताः ॥ एकैकशस्ताः संभिन्नाः सहस्रेण पृथक् पृथगिति स्कन्दोक्ताः षोड-शसहस्राणि मुख्यास्तासामपि मध्ये सहस्रसंख्याका मुख्यास्तत्रा-प्युक्ता अष्टौ मुख्यतरास्तत्रापि श्रीराधाचन्द्रावल्यौ मुख्ये । तत्रापि श्रीराधा परममुख्यतमेति विवेकः ॥

तासामित्यत आरभ्य निवृत्तिपक्षे, तासां श्रुतीनां संबन्धी शौरिः शूरः संसारविजयं कर्तुं प्रवृत्तोऽधिकारिदेहस्तत्र स्थितं वसु-देवशब्दाभिधेयमन्तःकरणं, तत्रैवोपलब्धियोग्यत्वाद्वासुदेव औपनि-षदः परमात्मा । तत्रैव सर्वसाधनसंपन्नाधिकार्यन्तःकरणलक्षणे वन एवाविरभूत् । अहं ब्रह्मास्मीति साक्षात्प्रकाटितः । आत्म-न्येवात्मानं पश्येदित्यादिश्रुतेः । तत्रापि सगुणः स्मयमानमु-खः स्मृजत्वादिरूपेणानिशं ध्यातः । स एव साक्षान्मन्मथश्चासौ मन्मथश्च सर्ववृत्तिसाक्षिरूपः । प्रतिबोधविदितं मतमिति श्रुतेः । तं तथाभूतमागतमधिकारिचेतसि आविर्भूतमवलोक्याबलाः साक्षात्त-त्प्रकाशनबलरहिताः श्रुतयः स्वानुकूलाऽधिकारिणि प्रीत्योत्फुल्ला विकासं प्राप्ता दृग् ज्ञानं यासाम् । अधिकारिणे प्रकाशिततत्त्वार्थ-

ज्ञानाः सर्वाः काण्डत्रयात्मिकाः युगपदुत्तस्थुः । यथाभूतस्वार्थाभिमुखा जाता इत्यर्थः । काचिदित्यादौ जातावेकवचनम् । काश्चिद् भगवदवयवभूततत्तद्देवयजनप्रतिपादिका इति कर्मकाण्डश्रुतीनां तात्पर्यं सूचितवान् । काश्चित्तदुपभुक्तनैवेद्यादिग्रहणपरास्तदङ्घ्रिध्यानप्रतिपादिकाश्चेत्युपासनाकाण्डश्रुतीनां तात्पर्यं ध्वनितवान् । काश्चिन्मुख्या, नेह नानास्ति किञ्चन, मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीत्याद्या भेददर्शनपरिक्रुद्धाः । काश्चित्तत्त्वमस्यहं ब्रह्मास्मीत्याद्याः पदार्थद्वयाऽभेदपराः, काश्चिदात्मानमेव लोकमुपासीतेत्याद्या निर्गुणोपासनपरा इति ज्ञानकाण्डश्रुतीनां तात्पर्यं सूचितवान् । सर्वा अपि ताः केशवस्य परमात्मनो योऽधिकारिण आलोकः साक्षात्कारस्तेन परमोत्सवस्तेन निर्वृता अहो अयं स्वात्मभूतपरमात्मानं न जानातीति तदीयविरहाज्जातो यस्तापस्तज्जहुः । ततश्च विधूतः शोको याभिः प्रसन्नाभिरिति वा, ताभिः श्रुतिभिर्वृतः सगुणो निर्गुणश्चाधिकं व्यरोचत सच्चिदानन्दस्वरूपतया प्रतिपाद्यः सन् सम्यगशोभतेत्यर्थः ॥ १० ॥

ताः समादाय कालिन्द्या निर्विश्य पुलिनं विभुः ॥
विकसत्कुन्दमन्दारसुरभ्यनिलषट्पदम् ॥ ११ ॥
शरच्चन्द्रांशुसन्दोहध्वस्तदोषातमः शिवम् ॥
कृष्णाया हस्ततरलाञ्चितकोमलवालुकम् ॥ १२ ॥
तद्दर्शनाह्लादविधूतहृद्रुजो
मनोरथान्तं श्रुतयो यथा ययुः ॥
स्वैरुत्तरीयैः कुचकुङ्कुमाङ्कितै-
रचीक्लृपन्नासनमात्मबन्धवे ॥ १३ ॥

ततः काश्चित् प्रियालापैः काश्चिद् भ्रूभङ्गवीक्षितैः * निन्येऽनुनयमन्याश्च करस्पर्शेन माधव इति विष्णुपुराणोक्तहेतुभिर्विधूतशोकास्ताः सम्यग् हस्तधारणप्रियालापादिसमीचीनप्रकारेणादाय सह गृहीत्वा रासक्रीडायोग्यं कालिन्द्याः पुलिनं निर्विश्य ताभिर्व्यरोचनेत्यनुसंबन्धनीयम् । कलिं कलहं द्यति खण्डयतीति कलिन्दस्तस्याः कन्या कालिन्दी । तथाच तत्पुलिने गोपीनां परस्परं मया च कलहो न भविष्यतीति तत्र नयनस्याशयः । विभुत्वं व्यापकत्वात् सर्वासामैकमत्यसंपादकः । तत्र नयने समर्थ इति वा । पुलिनस्य रासयोग्यतामाविष्करोति ॥ विकसत्कुन्दमन्दारैः सुरभिर्यो वायुस्तस्मात् षट्पदा यत्र ॥

पुनश्च शरत्कालीनचन्द्रकिरणानां समूहैर्ध्वस्तं दोषाया रात्र्यास्तमो यत्र तेन दिवसतुल्यकालत्वादत्यन्तशोभनम् । पुनश्च कृष्णसदृशवर्णनामधेयाया भगवत्सख्या यमुनाया भगवद्रमणार्थं पुलिनभूमिं संस्कृत्य स्थिताया हस्तरूपैस्तरङ्गैराचिता आस्तृता कोमलवालुका यत्र । तरङ्गैः पुलिनभूमेः समतासम्पादनात्तेषां हस्तत्वनिरूपणम् । तथाच जलसुगन्धपुष्पवायुनादैः परितो वेष्टितं सुप्रकाशवत् शीतलं समं चेति बोधितम् ॥ अथ गोपीनां कृत्यमाह ।

तस्य क्रीडोत्सुकस्य विभोर्दर्शनेन यो ह्लादस्तेन नाशिताः सर्वाधयो यासां ताः मनोरथस्यान्तं पूर्णकामतां ययुः । यथा श्रुतयः परमात्मनि समन्वयं प्राप्य कृतकृत्या भवन्ति तद्वत् । ततः सुस्थिरचित्ताः सत्यः कुचकुङ्कुमेन स्वेदार्द्रेणाङ्कितैः स्वीयैरुत्तरीयैरासनं कृतवत्यः । यत आत्मबन्धवे, अभिज्ञापक्षे, अन्तर्यामिणे, तदुत्तरपक्षयोः स्वप्रेष्ठाय । तथाच ईदृशोत्तरीयैस्तदासननिर्माणमुचितमेवेति भावः । एतेनाहो पूर्वमुपदेशं कर्त्तुं प्रवृत्तोऽस्माभिर्निवारित आसीत् कदाचिद् दुःखादेव तिरोहितः स्यादतोऽधुना प्रथमं व्यासासनो-

पर्युपनेश्यैतन्मुखारविन्दादुपदेश एव ग्राह्य इत्याशयेनैवं कर्तुं प्रवृत्ता इति ध्वनितम् ॥

निवृत्तिपक्षे, ताः श्रुतीः स्वप्रतिपादकत्वेन समादाय कालिन्द्या मायायास्तीरं शुद्धान्तःकरणं निविश्य, विभुर्व्यरोचत विकासं प्राप्तः । कुन्दमन्दारादिस्थानीयैर्यमनियमादिभिः सुरभिर्योऽनिलः निरुद्धः प्राणवायुस्तेन निरुद्धं षट्पदं षड्वर्गो यत्र । पुनश्च शरत्कालस्थानीयेन निष्कामभगवदाराधनलक्षणेन कर्मणोदितो यो विवेकाख्यश्चन्द्रस्तस्य विचारलक्षणानामंशूनां सन्दोहेन समूहेन ध्वस्तं रागद्वेषादिदोषलक्षणमासमन्तात् तमो यस्मिन् । अत एव शिवं कल्याणरूपं पुनश्च कृष्णाया अविद्याया हस्तैर्हस्तलक्षणैस्तरङ्गैरात्मानात्माज्ञानभेदैरचिता असंस्पृष्टा कोमला वालुकास्थानीया वृत्तयो यस्मिँस्तस्य प्रत्यगभिन्नस्य परमात्मनो दर्शनेन य आह्लादस्तेन विधूतास्तद्वादिकल्पिता विपरीताभिप्रायरूपा हृदयरोगा यासां ताः श्रुतयो मनोरथस्याखण्डैकरसरूपपरमात्मप्रतिपादनाभिलाषस्यान्तं समाप्तिं ययुः । कुचकुङ्कुमेन कर्मोपासनाकाण्डबोधितकर्मोपासनाद्यनुष्ठानासादितपरमात्मानुरागेणाङ्कितैः । स्वीयैरुत्तरीयैः स्वजन्यप्रत्ययैरात्मबन्धवे औपनिषदाय परब्रह्मणे आसनमभिव्यक्तिस्थानं कृतवत्यः ॥ ११ ॥ १२ ॥ १३ ॥

तत्रोपविष्टो भगवान् स ईश्वरो
योगीश्वरान्तर्हृदि कल्पितासनः ॥
चकास गोपीपरिषद्गतोऽर्चित-
स्त्रैलोक्यलक्ष्म्येकपदं वपुर्दधत् ॥ १४ ॥

स भगवानपि ईश्वरः स्वतन्त्रोऽपि तत्र ताभिरुत्तरीयैर्निर्मित

आसने उपविष्टः, किञ्च, योगीश्वरैर्ब्रह्मादिभिरन्तर्हृदि एकाग्रे मनसि कल्पितमासनं यस्य तथाभूतोऽपि, यद्यप्येवं तथापि गोपीपरिषद्गतः तत्सभापतिस्ताभिस्ताम्बूलनर्मस्मितादिना अर्चितः सन् अधिकं शुशुभे । यतस्त्रैलोक्यस्य चतुर्दशभुवनस्य या सौन्दर्य्यलक्ष्मी तस्या एव मुख्यं पदमायतनं पुनर्विग्रहं दधत् प्रकटयन् सन् यद्वा गोपीपरिषद्गतत्वादिरूपेण योगीश्वरान्तर्हृदि कल्पितासनः । अत्रोत्तरीयैरासनस्य निर्माणेऽपि तदन्तस्तादृशवस्त्रान्तरस्य सत्त्वात्, तत्क्षण एव भगवत्कृपया दिव्योत्तरीयोद्भवसम्भवाच्च न तासां रसाभासकरी नग्नता शङ्का ॥

निवृत्तिपक्षे, तत्र योगीश्वरान्तर्हृदि कल्पितासनो भगवानीश्वरः स परमात्मा गोपीनां गोपस्य समन्तात्स्फूर्तिप्रदानेन सर्वपालकस्य देवस्यावबोधनपराणां श्रुतीनां समवायस्तत्प्रतिपाद्यतया अर्चितः निखिलप्रपञ्चशोभाया एवमधिष्ठानभूतं वपुर्दधत् ॥१४॥

एवं यथोक्तासनोपर्य्युपविष्टं भगवन्तं किञ्चित् पप्रच्छुरित्याह ।

सभाजयित्वा तमनङ्गदीपनं
सहासलीलेक्षणविभ्रमभ्रुवा ॥
संस्पर्शनेनाङ्ककृताङ्घ्रिहस्तयोः
संस्तुत्य ईषत्कुपिता बभाषिरे ॥ १५ ॥

सभाजयित्वेति ॥ तं सम्मान्य ईषत्कुपितास्ता बभाषिरे । यतः कामं नानाविलासैर्दीपयतीति अनङ्गदीपनम् । केन सम्मान्येत्यपेक्षायामाह ॥ हासलीलापूर्वकं यदीक्षणं तेन विभ्रमो विलासो यस्याः, तया भ्रुवा । पुनश्चाङ्कीकृतयोः स्वस्वाङ्के गृहीतयोरङ्घ्रिहस्तयोः संस्पर्शनेन । ततश्च संस्तुत्य भवानेवास्माकं गतिः

परमानन्दप्रद इत्येवमादिवचनैः स्तुत्वा बभाषिरे ॥

मानिनीपक्षे, स्वहासलीलेक्षणविभ्रमभ्रुवा अनङ्गस्य दीपनं यस्य तं, तेनैव स्वाङ्के कृतयोरङ्घ्रिहस्तयोः संस्पर्शनेन संस्तुत्याहो तव करचरणकमलयोरपूर्वं शैत्यं यत्संस्पर्शादस्मत्तापोऽपि निवृत्तते । तस्मात् सम्प्रति तापानभिज्ञश्चन्द्रवत् सर्वदा सख्येवासीति व्याजेन स्तुत्वा तद्दर्शनादिना कोपस्य कुण्ठितत्वादीषत्कुपिता बभाषिरे ॥

निवृत्तिपक्षे, अनङ्गस्य सवासनस्य सकारणस्य कामादेर्दीपनम् । तेषामेवानुकम्पार्थमहमज्ञानजं तमः * नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वतेति । सहासलीलापूर्वकेणेक्षणेनासंख्यातजगदुत्पादकेन तत्सहितेन विभ्रमवत्या भ्रुवा तत्प्रलयहेतुभूतया उपलक्षितम् । अङ्घ्रिहस्तयोरित्युपलक्षणम् । स्वस्मिन् प्रतिपाद्यानामसंख्यातावयवानां संस्पर्शेन दूरतः सहस्रशीर्षा इत्यादिना प्रतिपादनेन संस्तुत्य । अहो अस्माकमप्यगम्य इत्येवमीषत्कुपिता बभाषिरे । तथाचैवंविधानां श्रुतीनां कथमगम्यः परमात्मेत्यधिकारिचेतसि शङ्का समुत्थितेति भावः ॥ १८ ॥

अहो विज्ञातमस्माभिर्भवत उपदेशकरणे महत्युत्कण्ठा वर्ततेऽतः सम्प्रत्यस्मत्प्रश्नानुसारेण यथेष्टमुपदिश्य तेन च प्रसङ्गो भवेति द्योतयन्त्यस्तस्याकृतज्ञतां तन्मुखेनैवोद्घाटयितुकामा गूढाऽभिप्राया लोकवृत्तान्तमिव पृच्छन्ति ॥

गोप्य ऊचुः ॥

भजतोऽनुभजन्त्येके एक एतद्विपर्ययम् ॥

नोभयाँश्च भजन्त्येक एतन्नो ब्रूहि साधु भोः ॥ १६ ॥

भजत इति ॥ भजतः प्राणिनः, अनु पश्चात् केचिद् भजना-

ऽनुसारेण भजन्ति । एके त्वेतद्विपर्ययं यथा भवति तथा । अ-भजतोऽपि तद्भजनानपेक्षा भजन्ति । एके तु उभयान् भजतोऽभजतश्च न भजन्ति । एतत्पक्षत्रयमपि सोदाहरणं साधु सम्यक् नो ब्रूहि । सावधानतयैतदुत्तरं वक्तव्यमिति द्योतयितुं, भो इति सम्बोधनम् ॥ १६ ॥

तासामभिप्रायमवगत्य क्रमेणोत्तरमाह ।

श्रीभगवानुवाच ॥

मिथो भजन्ति ये सख्यः स्वार्थैकान्तोद्यमा हि ते ॥
न तत्र सौहृदं धर्मः स्वार्थार्थं तद्धि नान्यथा ॥ १७ ॥

मिथ इति ॥ ये मिथोऽन्योऽन्यं परस्परोपकाराकाङ्क्षया भजन्ति ते स्वार्थ एवैकान्तत उद्यमो येषान्तथाभूताः । न ते कञ्चिदन्यं भजन्ति किन्तु स्वात्मानमेव दृष्टफलार्थित्वात् प्रसिद्धं चेदम् । बहवश्चैतदुदाहरणभूता, अतो नाधिकमत्र वक्तव्यमिति द्योतनाय हिशब्दः । तत्र सत्कीर्तिकरं सौहृदम्, निर्व्याजेन हितैषित्वं नास्ति । नापि धर्मो दृष्टोद्देशात् । यद्वा, नात्रैवंविधे भजने सौहृदं धर्मः, किन्तु मित्रतालक्षणो धर्मः । हि यतस्तद्भजनं स्वार्थं पशूनां परस्परकण्डूयनसदृशं नान्यथा । स्वार्थाभावे निवर्तते । हे सख्य इति संबोधयन् युष्माकं मम च नैवंविधं मित्रत्वमपि तु निरुपाधिकं सख्यमिति द्योतयति ॥ १७ ॥

द्वितीयप्रश्नस्योत्तरमाह ।

भजन्त्यभजतो ये वै करुणाः पितरौ यथा ॥
धर्मो निरपवादोऽत्र सौहृदं च सुमध्यमाः ॥ १८ ॥

भजन्तीति ॥ ये अभजतोऽपि भजन्ति ते द्विधा-संबन्धरहि-

तास्तद्वन्तश्च । तत्राद्याः करुणा दयालवो यथा, द्वितीयाः पितरौ यथा । अत्र प्रथमपक्षे निरपवादो धर्मो, निरुपाधिकत्वादनश्वरः । द्वितीयपक्षे निरपवादं सौहृदम् । यद्वा पक्षद्वये निरपवादो धर्मः सौहृदं च । यद्वा अत्र सौहृदरूपो धर्मो निरपवादः । सुमध्यमा इति संबोधयन् करुणायाः संबन्धस्य च विषयभूता भवत्य इति सूचयति । श्लेषेण शोभनो मध्यमप्रश्नो यासां ताः । सुष्ठुमध्यमपक्षोदाहरणभूता भवत्य इति वा ज्ञापयति ॥ १८ ॥

तृतीयप्रश्नस्योत्तरमाह ।

भजतोऽपि न वै केचिद्भजन्त्यभजतः कुतः ॥
आत्मारामाश्चाप्तकामा अकृतज्ञा गुरुद्रुहः ॥ १९ ॥

भजत इति ॥ ते चतुर्विधाः - केचिदात्मारामा अन्तर्मुखाः, केचिद्बहिर्मुखा अपि पूर्णत्वादाप्तकामा उपकारापेक्षारहिताः । केचिदकृतज्ञा उपकारानपकारज्ञानविधुरा अत्यन्तमूढाः । केचिद् उपकर्ता गुरुः स्मृत इत्युक्ता गुर्वादय उपकारिणस्तान् द्रुह्यन्तीति ते । तथाच तदुपकारं न जानन्ति प्रत्युतापकारं प्रकुर्वन्ति ते अतिकठिना इत्यर्थः ॥

निवृत्तिपक्षे समानार्थकम् ॥ १९ ॥

एतेषु मध्ये भवान् क इत्यभिज्ञानापेक्षायाम्,अहो स्वमुखेनैव चरमकोटिप्रविष्ट इति संतुष्टा अक्षिसंकोचैः परस्परं गूढस्मितमुखीर्मानिनीश्चालक्ष्याह ।

नाहन्तु सख्यो भजतोऽपि जन्तून्
भजाम्यमीषामनुवृत्तिवृत्तये ॥

यथाऽधनो लब्धधने विनष्टे
तच्चिन्तयान्यन्निभृतो न वेद ॥ २० ॥
एवं मदर्थोज्झितलोकवेद-
स्वानां हि वो मय्यनुवृत्तयेऽबलाः ॥
मया परोक्षं भजता तिरोहितं
मासूयितुं मार्हथ तत्प्रियं प्रियाः ॥ २१ ॥
न पारयेऽहं निरवद्यसंयुजां
स्वसाधुकृत्यं विबुधायुषापि वः ॥
या माभजन् दुर्जरगेहशृङ्खलाः
संवृश्च्य तद्वः प्रतियातु साधुना ॥ २२ ॥

नेति ॥ हे सख्यः, अहं तु भजतोऽपि न भजामि । तुशब्देन पक्षान्तरव्यावृत्तिः । तच्चाभजनं नाकृतज्ञत्वादिनिबन्धनं, किन्तु तदनुवृत्तिधारेच्छानिबन्धनमित्याशयेनाह॥अपीषां भजतां जन्तूनाम् अनुवृत्तये निरन्तरध्यानप्रवृत्त्यर्थं नाहं भजामि । जन्तुमात्रं प्रति यद्येवं तदा मत्प्रियाः युष्माकं प्रति किं वक्तव्यमिति संबोधनाशयः । तथाच कारुणिकः परमसुहृदहं, न त्वकृतज्ञ इति भावः । एतत् सदृष्टान्तमाह ॥ यथेति ॥ यथा अधनो दरिद्रो दैववशाल्लब्धधनो जातः पुनश्च तस्मिँल्लब्धे धने विनष्टे सति तस्य धनस्यैव चिन्तया निभृतः पूर्णः, अन्यत् क्षुत्पिपासादिकमपि न वेद ॥

एवं वो युष्माकं मय्यनुवृत्तये परोक्षप्रदर्शनं यथा लोकादित्यागे दुर्बला इति तदाशयः । मया तिरोहितं तिरोधाय स्थितम् । यतो मदर्थोज्झितलोकवेदस्वानां मदर्थमेव त्यक्तो लोको युक्तायुक्ताप्रतीक्षणाद्, वेदश्च धर्म्माधर्मानादरात्, स्वज्ञातयश्च स्नेहत्यागाद् याभिस्तासाम् ।

न तु भवतीष्वबलासु बलं प्रकटयितुं मया तिरोहितमिति सूचनाय संबोधनम् । हे अबलाः । भवत्यः, तथा भजता युष्मत्प्रेमाकुलेन, अत एव तत् तस्मात् प्रियं मासूयितुं दोषरोपेण द्रष्टुं यूयं मा अर्हथ, न योग्याः स्थ । यथाहं युष्माकं प्रियस्तथैव यूयमपि प्रियाः । अत्रार्थे संशयो न कर्तव्य इत्याशयेन संबोधयति ॥ हे प्रिया इति ॥ मानिनीपक्षे, यद्यप्येवं तथापि तादृशं प्रियं मां प्रिया यूयमसूयितुं मार्हथेति मा, प्रियस्य प्रियासु तथा प्रवृत्तेरनुचितत्वादिति भावः ॥

आस्तामिदं परमार्थन्तु शृणुतेत्याह ।

नेति ॥ कामप्रयत्नेन प्रतीयमानाऽपि वस्तुतो निर्मलप्रेमप्रयत्नेन निरवद्या निर्दोषा संयुग् मद्विषयकचित्तैकाग्रता अङ्गसङ्गमो वा यासां तासां वः स्वीयसमीचीनप्रत्युपकारकृत्यं विबुधायुषा देवायुषा ब्रह्मायुषा वा विबुधानां ज्ञानिनां मतेनायुषाऽपि न पारये, प्रत्युत हेतुर्लोकवेदमर्यादाः विवृश्च्य निःशेषं छित्वा मा मामभजन् शरीराद्यर्पणं कृतवत्यः । तथाचाभिज्ञापक्षे, भजनस्य जीवधर्मत्वात्तादृशभजनस्य मयि दुर्लभत्वान्न पारये । अनभिज्ञापक्षे मम चित्तस्य पितृभ्रातृबन्ध्वादिष्वपि स्निग्धत्वात् न पारये ॥ मानिनीपक्षे, मम चित्तं बह्वीषु प्रेमयुक्तं, न त्वनन्यतां गतमतो न पारये । तत्तस्माद्युष्माकमेव साधुना साधुत्वेन प्रतियातु प्रत्युपकृतं भवतु । तथाच युष्मत्सौशील्येनैव ममाऽऽनृण्यं, न तु मत्कृतेन प्रत्युपकारेणेति भावः ॥

निवृत्तिपक्षे, भजतोऽपि जन्तूनहं न भजामि, विषयतया तेषां प्रकटो न भवामि । किमर्थमिति चेत्तत्राह-अनुवृत्तये, प्रतिबोधाविदितत्वासिद्धये । एतत् सदृष्टान्तमाह ॥ यथेति ॥ एवं वां युष्माकं मय्यनुवृत्तये मदर्थोज्झितलोकवेदस्वानां विवेकिनां परोक्षं भजता वर्तमानेन मया परोक्षतया लब्धेनापि मया तिरोहितम् अन्तर्द्धानेन स्थितम् ।

तथाच यावद् ब्रह्मसाक्षात्कारो न भवति तावच्छ्रवणाद्यावृत्तिः कर्त्तव्या परोक्षतया भातस्य तिरोहितत्वात्। तथाच भगवतो बादरायणस्य सूत्रम्—आवृत्तिरसकृदुपदेशादितीति भावः । तस्मात् प्रियाः, प्रतिपादकत्वेनाभिप्रेता यूयं प्रियं प्रतिपादकत्वेन संमतं माम्। अहो अस्मद्विचारपरस्य झटिति प्रत्यक्षतया कुतो न भातीत्यऽसूयितुं मार्हथेत्यर्थः ॥

आस्तामिदं जीवरूपेण बद्धस्य मम बन्धननिवारकाणां युष्माककमुपकारस्य प्रत्युपकारं त्वहं न पश्यामीत्याह ॥ नेति ॥ निरवद्ये कर्तृत्वादिदोषासंस्पृष्टे मयि संयुजां तात्पर्येण संगतानां वः स्वसाधुकृत्यं विबुधायुषाऽपि न पारये, यतो भवत्यो दुर्जरा देहगेहादिशृङ्खला मदीयाः संवृश्च्य माभजन् तत्तस्मात् युष्मत्साधुकृत्यं वः साधुत्वेन प्रतियातु, श्रुतिकृतोपकारस्य प्रत्युपकारः केनापि कर्त्तुमशक्य इत्यर्थः ॥ २० ॥ २१ ॥ २२ ॥

इति श्रीधनपतिमिश्रकृतौ गूढार्थदीपिकायां द्वात्रिंशत्तमोऽध्यायः॥

अथ त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

त्रयस्त्रिंशे ततोऽध्याये हरेर्लीला निरूप्यते ॥
वने जले च बहुधा राजप्रश्नोत्तरं तथा ॥ १ ॥

अथ रासोत्सवं वर्णयिष्यन्नादौ भगवतोक्तानुनयवाक्येन ताः सम्यक् प्रसन्नाः सम्पन्ना इत्याह ॥

श्रीशुक उवाच ॥

इत्थं भगवतो गोप्यः श्रुत्वा वाचः सुपेशलाः ॥
जहुर्विरहजं तापं तदङ्गापचिताशिषः ॥ १ ॥

इत्थं पूर्वोक्तप्रकारेण भगवतः पूर्णस्याहं भवतीनामधमर्ण इत्येवंरूपाः, गोप्यः—भगवता स्वीयत्वेन स्वीकृता वयं न तु त्यक्ता इति निश्चयवत्यः, तादृशाऽधिकाराऽयोग्या अपि वयं भगवतैवमनुनीता इति मनसि विचारयन्त्य इति वा, वाचः श्रुत्वा विरहजं तापं जहुः । यतो भगवद्वचः सुपेशला अतिमनोहराः । आपातरम्यतानिरासाय सुपदं प्रयुक्तम् । यतश्चोपचिताशिषः लब्धमनोरथाः । यद्वा तस्य भगवतोऽङ्गेन वपुषा करणाद्यङ्गैर्वा उपचिताः समृद्धा आशिषो यासां ताः । यद्यपि पूर्वं तापत्याग उक्तस्तथापि तादृशवाक्श्रवणादिना पुनर्विरहशङ्कानवगमाद्विरहजन्यतापत्यागः पुनरुक्तः । तासां गोपीनामङ्गस्पर्शादिना लब्धसुखा इति वा । एतेन प्रश्नोत्तरसमाप्तौ मानशान्त्या तदा आलिङ्गनचुम्बनादिविलासा आसन्निति सूचितम् ॥

निवृत्तिपक्षे, अथ विशुद्धचेतसि परमात्मनः श्रुतिभिः रमणं वक्तुमुपक्रमते ॥ इत्थमिति ॥ भगवद्भावं प्राप्तस्य प्रत्यगात्मनो य-

थोक्ताः सुपेशला वाचः श्रुत्वा लब्धमनोरथास्तदा, हे राजन्, तच्छ्रद्धादिभिः श्रुतिषु प्रत्यगभिन्नपरमात्मप्रतिपादनं नास्तीत्यादिना प्रतिपादिततद्विरहाज्जातं तापं जहुः ॥ १ ॥

तत्रारभत गोविन्दो रासक्रीडामनुव्रतैः ॥
स्त्रीरत्नैरन्वितः प्रीतैरन्योन्याबद्धबाहुभिः ॥ २ ॥

तत्र ताभिः सहैकमत्ये सति, तस्मिन् प्रदेश इति वा गोविन्दः स्त्रीरत्नैः समन्वितो रासक्रीडामारभत । नटैर्गृहीतकण्ठानामन्योन्यात्तकरश्रियाम् * नर्त्तकीनां भवेद्रासो मण्डलीभूय नर्तनमित्युक्तं रासलक्षणम् । रसानां समूहो रासस्तन्मयी क्रीडेति तद्व्युत्पत्तिः । एतदर्थमेव स्वीकृतगवेन्द्राभिषेक इति सूचयितुं गोविन्द इत्युक्तम् । भगवता सार्द्धं रासक्रीडायोग्यता तासामेवासीदिति सूचनाय रत्नैरित्युक्तम् । तत्राप्यनुव्रतैस्तत्रापि नान्यानुरोधेन, किन्तु प्रीतैः प्रीतिपूर्वकमुत्कटोत्कण्ठावद्भिः । कथमित्यपेक्षायामन्योन्यं वा बद्धाः सङ्ग्रथिता बाहवो याभिस्तैः । तथाचान्योन्याबद्धबाहूनां भगवता गृहीतकण्ठानां नर्तनं सम्प्रवृत्तमित्यर्थः ॥

निवृत्तिपक्षे, तत्र श्रुतीनामैकमत्ये सति विद्वदन्तःकरण इति वा । गोविन्दः श्रुत्यैकगम्यः परमात्मा श्रुतिलक्षणस्त्रीरत्नैः श्रुतिमस्तकैरन्वितः प्रतिपाद्यप्रतिपादकसम्बन्धवान् । रसो वै स इति श्रुत्या रस आनन्दरूपः परमात्मा तदीयां तदाविर्भावकरीं क्रीडां श्रुतिप्रतिपाद्यतालक्षणां लीलामारभत । तत्र कापि श्रुतिरद्वितीयब्रह्मानुसृता न स्थिता इत्याशयेनाह ॥ अनुव्रतैः ॥ तत्रापि न क्लिष्टकल्पनया तत्र नीता इत्याशयेनाह ॥ प्रीतैरिति ॥ तत्रापि परस्परविरोधराहित्येनेत्याशयेनाह ॥अन्योन्येति ॥ परस्परमाबद्धा अविरोधं प्राप्ता बाहुस्थानीया वाक्यार्था येषां तैः ॥ २ ॥

चतुर्वर्णाधिकेन सार्द्धेन तत्साहित्यं दर्शयति ।

रासोत्सवः सम्प्रवृत्तो गोपीमण्डलमण्डितः ॥
योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः ॥ ३ ॥

रासेति ॥ तासां रासक्रीडालक्षण उत्सवो मनोविस्मापकाह्लादरूपः सम्यक् प्रवृत्तः । यथा उत्सवोऽनेकविधैर्ब्राह्मणादिभिर्मण्डितो भवति तथाऽयमुत्सवो गोपीनां बहुविधैर्मण्डलैर्मण्डितः । कथम्भूतानां तासां, कृष्णेन कण्ठे गृहीतानाम् । कथम्भूतेन कृष्णेन द्वयोर्द्वयोर्मध्ये प्रविष्टेन । कृष्णपदेनानवच्छिन्नानन्दसमुद्रे तासां निमग्नता सूचिता । नन्वेकस्य कथमेककालमेवंविधः भवेश इत्याशङ्कानिरासायोक्तं योगेश्वरेण ॥ योगः अघटितघटनापटीयसी महामायाशक्तिस्तस्या ईश्वरेण । तथाच तादृशशक्त्या तस्य तथा प्रतीतिरित्याशयेनाह ॥ यं श्रीकृष्णं स्त्रियः स्वनिकटं मन्येरन् । अत्र गोपीद्वयान्तरितः कृष्ण इत्युक्त्या गोप्यर्द्धसंख्यककृष्णमूर्तिसंयुक्तो रासोत्सवः । तेन गोपीसमसंख्याकत्वन्मूर्तियुक्तेन वक्ष्यमाणेन तेन न पौनरुक्त्यम् । किञ्चात्र न तावत्संख्याकमूर्तिस्वीकारः, किन्त्वेक एवातिलाघवेन तथा नृत्यति स्मात एव, यं मन्येरन्नित्युक्तम् । न तु तथा दृष्टवस इति । इयं च भगवल्लीला परमोत्कृष्टा लक्ष्म्यादीनामपि प्रार्थनीया परमदुर्लभा चेति बोध्यम् । रासोत्सव इत्यारभ्य, कथालङ्कारार्थं पुरञ्जनोपाख्याने नगरीवर्णनवद्रासवर्णनमतो निवृत्तिपक्षाविवरणप्रयत्नादुपरम्यते ॥ ३ ॥

प्रविष्टेन गृहीतानां कण्ठे स्वनिकटं स्त्रियः ॥
यं मन्येरन्नभस्तावद्विमानशतसंकुलम् ॥ ४ ॥

तावत् क्षणमेवौत्सुक्याकृष्टचेतसां सस्त्रीकाणां देवानां विमान-

घातैः संव्याप्तं नभ आसीदिति शेषः । स्वर्गसबन्धिनृत्यगीतादिकं तेषां तदानीं तुच्छमभूदिति सूचनाय दिवौकसामित्युक्तम् । रसान्तरव्यग्रतानिरासाय, सदाराणामित्युक्तम् । ननु भगवल्लीलां द्रष्टुमधिकाराभावात् कथं तत्र प्रवृत्ता इत्याशङ्कानिवृत्त्यर्थमुक्तमौत्सुक्येति । तत्रापि यावत् तेषां दर्शनीयं स्थितं तावदेव तेषां दर्शयामास भगवानिति द्रष्टव्यम् ॥ ४ ॥

देवा अपि न केवलं कौतुकद्रष्टार एव बभूवुरपि तु रासक्रीडापरिकरतां ययुरित्याशयेनाह ॥

दिवौकसां सदाराणामौत्सुक्यापहृतात्मनाम् ॥
ततो दुन्दुभयो नेदुर्निपेतुः पुष्पवृष्टयः ॥
जगुर्गन्धर्वपतयः सस्त्रीकास्तद्यशोऽमलम् ॥ ५ ॥

ततस्तदनन्तरं देवैर्वादिता दुन्दुभयो नेदुस्तथा तैरेव क्रियमाणाः रङ्गाधिष्ठानदेवतापूजार्थं स्तरणार्थं च पुष्पवृष्टयो निपेतुः । नानाविधानां पुष्पाणां भिन्ना वृष्टय इति द्योतनाय बहुवचनम् । ततो गन्धर्वपतयो गानाधिकारिमुख्या विश्वावसुप्रमुखा जगुः । भगवान् श्रोष्यतीति मत्वा तत्पतयो जगुरित्याशयः । तत्रापि सस्त्रीकाः प्रेमाविष्टत्वात् तत्त्वादव्यग्रचित्ता इति भावः । तत्रापि तां भगवल्लीलामवलोक्य न तेषां भगवति विषयित्वबुद्धिरासीदित्याशयेनाह ॥ तस्य तादृशक्रीडायां निष्ठस्य भगवतो निर्मलं यश इति तथाच तद्दर्शनं शुद्धबुद्धीनां तेषां मलानिवर्तकमभूदितिभावः ॥ ५ ॥

एवं बाह्यवाद्यादिकमुक्त्वा नृत्यमध्ये रसोपयोगीनि वादित्राण्याह ।

वलयानां नूपुराणां किङ्किणीनां च योषिताम् ॥
सप्रियाणामभूच्छब्दस्तुमुलो रासमण्डले ॥ ६ ॥

वलयानामिति ॥ तत्राप्युपरि योषितां वलयानां मध्ये नूपुराणां मध्ये किङ्किणीनां शब्दो रासमण्डले तुमुलः संकीर्णोऽभूत् तत्रापि प्रियेण श्रीकृष्णेन सह वर्तमानानाम् । तथाच तत्क्रियायां न कस्या अपि कृष्णविश्लेष आसीदिति भावः । चकारेण संगृहीतस्य करतालादिशब्दस्याप्राधान्यं व्यज्यते । ननु महामायानटीनर्तकस्य भगवतस्तत्र नृत्यतः का शोभेत्याशङ्क्याह ॥

तत्रातिशुशुभे ताभिर्भगवान् देवकीसुतः ॥
मध्ये मणीनां हैमानां महामरकतो यथा ॥ ७ ॥

तत्रेति ॥ तत्र तस्मिन् रासमण्डले भगवानपि देवकीसुतोऽपि अत्यर्थं शुशुभे । तत्र दृष्टान्तः । सौवर्णानां मणीनां मध्ये मध्ये महामरकतो नीलमणिर्यथा शोभते तद्वत् गोपीदृष्ट्यभिप्रायेणैव विनैव मध्यपदान्द्विभिकवचनम् । यद्वा कदाचिन्मण्डलमध्यगतो वेणुं वादयन् शुशुभे । तदुक्तं विल्वमङ्गले । अङ्गनामङ्गनामन्तरे माधवो माधवं माधवं चान्तरे चाङ्गना ॥ इत्थमाकल्पिते मण्डले मध्यगः संजगौ वेणुना देवकीनन्दन इति ॥ ७ ॥

स यथा ताभिः शुशुभे तथा ता अपि तेन विरेजुरित्याह ।

पादन्यासैर्भुजविधुतिभिः सस्मितैर्भ्रूविलासै-
र्भज्यन्मध्यैश्चलकुचपटैः कुण्डलैर्गण्डलोलैः ॥
स्विद्यन्मुख्यः कवरसनाग्रन्थयः कृष्णवध्वो
गायन्त्यस्तं तडित इव ता मेघचक्रे विरेजुः ॥ ८ ॥

पादन्यासैः संगीतशास्त्रोक्तनृत्तानुकूलपादगतभेदैः । भुजविधुतिभिरन्योन्याबद्धभुजानामपि यथोक्तक्रीडानुकूलैः कम्पनविशेषैः । यद्वा कदाचिदन्योन्याबद्धबाहुमुन्मुच्याभिनयार्थं कृतैश्चालनैः

सस्मितैर्भ्रुवां विलासैः, कार्श्यात् कुण्डलीभवन्मध्यभागैः, चलद्भिः कुचैस्तत्पटैश्च, गण्डेषु चञ्चलैः कुण्डलैः, स्विद्यन्ति स्वेदबिन्दूलंकृतानि मुखानि यासां, कबरेषु रशनासु च दृढा ग्रन्थयो यासां ताः। अग्रन्थयः शिथिलग्रन्थय इति वा, तं कृष्णं गायन्त्यो विरेजुः । तत्रानेकमूर्तिः श्रीकृष्णो मेघचक्रमिव, गोप्यस्तडित इव, स्वेदबिन्दवस्तुषार इव गीतं गर्जितमिवेत्यर्थात् सूचितम् । कृष्णवध्वः कृष्णभोग्यस्त्रियः वधूपदेन तस्यैव वस्तुतः स्वाभाविकाः स्त्रियः इति सूचितम् । स्वबधूवदेव चेष्टां कृतवत्य इति वा । तडित इवेत्यनेन तथाभूता अपि ता देवादिभिर्मेघचक्रे तडित इव कदाचित् शोभमाना दृष्टा इत्यपि ध्वनितम् ॥ ८ ॥

केवलनृत्यमुक्त्वा सङ्गीतं तदाह ।

उच्चैर्जगुर्नृत्यमाना रक्तकण्ठ्यो रतिप्रियाः ॥
कृष्णाभिमर्षमुदिता यद्गीतेनेदमावृतम् ॥ ९ ॥

नृत्यमाना नृत्यन्त्योऽप्युच्चैर्जगुः। शानजार्षः। नृत्ये मानो गर्व आदरो वा यासामिति वा। रक्तकण्ठ्यः। नानारागैरनुरञ्जितकण्ठाः स्निग्धकण्ठा इति वा। तथापि रतिरेव प्रिया यासाम्। यद्वा गानफलमाह ॥ रतिः कृष्णकर्तृका प्रीतिः प्रिया यासाम् । ननु तादृशचिरकालीननृत्ये श्रमापनोदस्तासां केन जात इत्याशङ्क्याह ॥ कृष्णेन सदानन्दरूपेण प्रेष्ठेन कृतः अभितो मर्षः प्रोञ्छनादिरूपस्तेन मुदिता मोदसागरे निमग्नाः । किञ्च तद्गीतेन सर्वैरपि सर्वं विस्मृतं, तासां श्रमविस्मरणे किं चित्रमित्याह ॥ यासामुच्चैर्गीतेनेदं विश्वमावृतमासीत् । यद्वा यासां स्वयं कल्पितेन षोडशसहस्रभेदभिन्नेन गीतेनेदमावृतं व्याप्तम् । यद्वा तद्विषयकेण लोकैः स्वोद्धारार्थं क्रियमाणेन गीतेनेदमावृतम् ॥ ९ ॥

अथ पञ्चभिस्तासां प्रेमचेष्टितान्याह ॥

काचित्सह मुकुन्देन स्वरजातीरमिश्रिताः ॥
उन्निन्ये पूजिता तेन प्रीयता साधुसाध्विति ॥ १० ॥

काचिदिति ॥

षड्जर्षभौ च गान्धारो मध्यमः पञ्चमस्तथा ।
धैवतश्च निषादश्च सर्वे स्युः श्रुतिसम्भवाः ॥
मयूरचातकच्छागक्रौञ्चकोकिलदर्दुराः ।
मातङ्गाश्च क्रमेणाहुः स्वरानेतान् सुदुर्गमान् ॥
रागस्तु जायते यस्याः सा जातिरभिधीयते ।
शुद्धा चाविकृता चेति सा द्विधा परिकीर्तिता ॥
शुद्धाः स्युर्जातयः सप्त ताः षड्जादिस्वराभिधाः ।
ता एव विकृताः सत्यो जाता विकृतसंज्ञया ॥
षड्जर्षभा च गान्धारी मध्यमा पञ्चमी तथा ।
धैवती चाथ नैषदी शुद्धा एतास्तु जातयः—

इत्युक्तजातीरमिश्रिता जात्यन्तरासंसृष्टा मुकुन्देन सह उन्निन्ये उत्कृष्टाः कल्पयामास । यद्वा कृष्णोन्नीताभिरसङ्कीर्णाः स्वरजातीः षड्जादिस्वरालापगतीरुन्निन्ये । सहशब्देन संख्याप्राधान्यमुच्यते । ततश्च प्रीयमाणेन तेन साधुसाध्विति पूजिता संमानिता । वीप्सा हर्षेण । इयं ललितानाम्नी श्रीराधासखी ॥ १० ॥

तदेव ध्रुवमुन्निन्ये तस्यै मानं च बह्वदात् ॥
काचिद्रासपरिश्रान्ता पार्श्वस्थस्य गदाभृतः ॥
जग्राह बाहुना स्कन्धं श्लथद्वलयमल्लिका ॥ ११ ॥

काचित्तु तदेव जात्युन्नयनमेव ध्रुवं ध्रुवाख्यं तालविशेषं कृत्वोन्निन्ये उन्नीतवती । तस्यै तथा गानपरायै बहु यथा स्यात् तथा मानम् अदात् । वस्त्रालिङ्गनादिदानपूर्वकं साधुवादं श्रीमुकुन्दः कृतवान् । विशाखाख्यैषा श्रीराधासखी ॥ एवं नृत्यगीतादिपराणां भगवता संमानितानां मध्ये कस्याश्चिदतिप्रीतिविलसितं वृत्तमाह ॥ काचित् पार्श्वस्थस्य, गदां नटवृन्दाधिपत्युचितां गदाकारां यष्टिं बिभर्त्ति, गदति वर्णानिति गदां वंशीमिति वा । तथाचानायासग्रहणस्य स्वानिरोधपरस्य मध्यशङ्कुस्थानीयमूर्तेः प्रेष्ठस्य स्कन्धं बाहुना जग्राह । यतो रासपरिश्रान्ता । यतः सौकुमार्य्यात् श्रमकार्श्येन श्लथन्तो वलया गलन्त्यो मल्लिकाश्च कबरस्था यस्याः । तथाच विश्रमाय तथा प्रवृत्तिपरा मध्यस्थप्रेष्ठसन्निहिता स्वाधीनभर्तृका प्रियापदप्रतिपाद्या सर्वाधिका श्रीराधिकाऽभिधालङ्कृतेयमिति ध्वनितम् ॥ ११ ॥

तत्रैकांसगतं बाहुं कृष्णस्योत्पलसौरभम् ॥
चन्दनालिप्तमाघ्राय हृष्टरोमा चुचुम्ब ह ॥ १२ ॥

तासु मध्ये एका रासपरिश्रान्तस्येषद्धाराक्रान्तस्य च कृष्णस्य स्वांसगतं बाहुं स्वभावत एव उत्पलतोऽप्यधिकं सौरभं यस्य तम् । तत्रापि चन्दनेनालिप्तं चुचुम्ब । यतो हृष्टरोमा अन्तर्मातुमशक्यत्वाद्रोमद्वारा बहिर्निःसृतेन हर्षेण युक्ता । प्रागल्भ्याख्योऽनुभावोऽयम् । निःशङ्कत्वं संप्रयोगे बुधैरुक्ता प्रगल्भतेत्युक्तेः । श्यामलाऽऽख्यैषा सखी ॥ १२ ॥

कस्याश्चिन्नाट्यविक्षिप्तकुण्डलत्विषमण्डितम् ॥
गण्डं गण्डे सन्दधत्या अदात्ताम्बूलचर्वितम् ॥ १३ ॥

कस्याश्चित्तु नाट्येन नृत्येन विक्षिप्ते चञ्चले कुण्डले च स्वाभाविकी गण्डत्विट् तत्समाहारः । नाट्यविक्षिप्तकुण्डलत्विषं तेन मण्डितं स्वगण्डं श्रीकृष्णगण्डे श्रमनिरासमनोरथेन सन्दधत्याः संयोजयन्त्याः स्वसंमुखं कृत्वा ताम्बूलचर्वितं प्रादात् शैव्याख्येयं सखी ॥ १३ ॥

नृत्यन्ती गायती काचित् कूजन्नूपुरमेखला ॥
पार्श्वस्थाऽच्युतहस्ताब्जं श्रान्ताधात् स्तनयोः शिवम् ॥ १४ ॥

अत्र काचित्पदाऽऽवृत्त्या द्वे सख्यौ प्रोक्ते इति ज्ञातव्यम् । तथाच कूजन्ती नूपुरे मेखला च यस्याः सा नृत्यन्ती काचित् पार्श्वस्थाच्युतहस्ताब्जं श्रमजनिततापनिवर्तकम् । अतः शिवं श्रमनिवृत्त्यर्थमञ्जलिना अधात् गृहीतवती । पूर्ववद्धस्तग्रहणाऽनुसारात् चन्द्रावलीसंज्ञेयं सखी । काचित्तु गायन्ती तद्धस्ताब्जं शिवं श्रान्ता सती श्रमनिवृत्त्यर्थं स्तनयोरधात् । चन्द्रावलीसाहचर्यात् स्तनयोर्धारणस्य पूर्वसाम्याच्च पद्माख्या चन्द्रावलीसुहृद्भूता सखीयम् । भद्रासंज्ञाऽष्टमी तु पूर्ववद्विष्णुपुराणादवगन्तव्या ।

काचित् परिलसद्बाहुं परिरभ्य चुचुम्ब तम् ।
गोपीगीतस्तुतिव्याजनिपुणा मधुसूदनम्—

इति तत्रोक्तेः ॥ १४ ॥

एवं मुख्यानामष्टानां वृत्तमभिधाय सर्वासां तदाह ।

गोप्यो लब्ध्वाऽच्युतं कान्तं श्रिय एकान्तवल्लभम् ॥
गृहीतकण्ठ्यस्तद्दोर्भ्यां गायन्त्यस्तं विजह्रिरे ॥ १५ ॥

गोप्य इति ॥ अच्युतं स्वस्वरूपात् कदाप्यप्रच्युतं श्रियः एकान्तवल्लभम् अव्यभिचारितप्रेमविषयं, न तु तथात्वेन लब्धं का-

न्तं लब्ध्वा, तत्रापि तद्दोर्भ्यां गृहीतकण्ठ्यो गायन्त्यः सत्यो विजह्रिरे । यद्वा श्रियः कान्तमात्रं, स्वस्य त्वेकान्तवल्लभम् । एतेन श्रियोऽप्याधिकसौभाग्यमासामुक्तम् । वक्ष्यते च, नायं श्रियोऽङ्ग उ विनान्तरतेः प्रसाद इति ॥ १५ ॥

तत्र गायकेषु वादकेषु च सस्त्रीकेषु गन्धर्वादिषु सविशेषेण मुह्यत्सु नृत्यत्सु चान्यामेव वाद्यादिसम्पत्तिं दर्शयन्नुक्तसौभाग्यं स्फोरयति ।

कर्णोत्पलालकविटङ्ककपोलघर्म्म-
वक्त्रश्रियो वलयनूपुरघोषवाद्यैः ॥
गोप्यः समं भगवता ननृतुः स्वकेश-
स्रस्तस्रजो भ्रमरगायकरासगोष्ठ्याम् ॥ १६ ॥

कर्णेति, द्वाभ्याम् ॥ कर्णोत्पलैश्च अलकविटङ्कैः कुटिलकुन्तलाऽलंकृतैः कपोलैश्च, घर्मैः स्वेदबिन्दुभिश्च वक्त्रेषु श्रीः शोभा यासामिति रासश्रमेऽपि शोभोक्ता । ननु श्रमेऽपि कुतो नृत्यप्रवृत्तिरित्याशङ्क्याह ॥ भगवता सममिति ॥ तथाच तत्साहित्यात्क्रमोऽपि ताभिर्न गणित इति भावः । यतश्च गोप्यः ॥ गोपस्य भगवतः संबन्धिन्यः । तथाच भगवति नृत्यति तदनुयायिनीनां तासां विरामो नोचित इति भावः ॥ भगवता सममित्यनेन भगवन्नृत्यसमं तासां नृत्यमिति कथितम् । वलयानां नूपुराणां च घोषाः शब्दायमानाः किङ्किण्यस्तद्रूपैर्वाद्यैर्वादित्रैः । पुनश्च भ्रमरा एव गायका यस्यां तस्यां राससभायां ननृतुः । अनेन लोकविलक्षणता ध्वनिता । तदानीं स्वकेशेभ्यः स्रस्ता विगलिताः स्रजो याभ्यस्ताः । एतेन नृत्यगतिसन्तुष्टाः स्वकेशाः सशिरःकम्पं पादेषु पुष्पवृष्टिमिव चक्रुरित्युत्प्रेक्षा दर्शिता ॥ १६ ॥

यथा गोप्यो नानाविभ्रमैर्भगवता सह विजह्रुरेवं भगवानपि स्वविलासैस्ताभिः सह रेम इत्याह ।

एवं परिष्वङ्गकराभिमर्ष-
स्निग्धेक्षणोद्दामविलासहासैः ॥
रेमे रमेशो व्रजसुन्दरीभि-
र्यथार्भकः स्वप्रतिबिम्बविभ्रमः ॥ १७ ॥

एवमिति ॥ रमाया ईशः पतिरपि व्रजसुन्दरीभिरेवं रेमे, न तयेति रमातोऽपि तासां प्रेमाधिक्यं सूचितम् । यद्वा, ननु प्राकृताभिस्ताभिरप्राकृतो भगवान् कथं रेम इत्याशङ्क्योक्तं,रमेश इति ॥ तथाच तासु भगवदाज्ञया रमा प्रविष्टाऽतस्तयैव भगवान् रेमे इति भावः । तास्तस्याः प्रवेशयोग्या इत्याशयेनाह ॥ व्रजसुन्दरीभिरिति ॥ यद्वा रमेशो व्रजसुन्दरीभिरिति पदद्वयेन रमया परास्त्रीरूपमादाय रममाणे भगवति द्वयोर्विलक्षणो रस उद्भूत इति ध्वनितम् । एवं पदार्थमाह ॥ परिष्वङ्गेति ॥ आश्लेषश्च तासां करालम्भनं च तन्मुखादीनां सप्रेमावलोकनम् उद्दामविलासः स्तनस्पर्शादिश्च भावव्यजकं स्मितं च तैस्तद्विलासानभिभूतस्यैव रतौ दृष्टान्तः, यथाऽर्भक इति ॥ स्वप्रतिबिम्बे विभ्रमः क्रीडा यस्यैवम् । एतेन स्वीयमेव कलाकौशलं सौगन्ध्यलावण्यमाधुर्य्यादिकं च तासु सञ्चार्य ताभिः सह रेम इति दर्शितम् । यद्वा तासां रमणयोग्यतायां दृष्टान्तः । तथाच गुणलावण्यादिना स्वतुल्याभिः स्वबन्धुत्वयोग्याभिस्ताभिः रेमे । अत एव पूर्वं कृष्णवध्व इत्युक्तम् । यद्वा यथा कश्चित् प्रतिबिम्बद्वारैव स्वमुखमाधुर्य्यमनुभवति तथा भगवानपि तादृशस्वप्रेयसीद्वारैवेत्येनेन व्यज्यते । यद्वा यथाऽर्भको मुग्ध-

स्तद्वत् । तथाच तासु प्रेमाधीनत्वान्मौग्ध्यमेवाश्रितवान्न तु रमायामिव वैदग्ध्यमिति भावः । नन्वसंख्याताभिः कथमेकस्य रमणमित्याशङ्क्याह ॥ स्वप्रतिबिम्बं प्रतिस्वरूपमेव विभ्रमो विलासो यस्य सः । तथाचैकैकया प्रियया सहैकैकस्वरूपः सन् रेमे इत्यर्थः । यद्वा परमेश्वरस्य नैवंविधा लीला घटत इत्याशङ्कानिवृत्त्यर्थमुक्तं यथार्भक इति ॥ तथाच यथा बाललीलां कृतवाँस्तथेमामपीति भावः ॥ यद्वा यथोक्तक्रीडादिना भगवति दोषापत्तिर्न शङ्क्या इत्याशयेनाह ॥ स्वेति ॥ तथाच स्वप्रतिबिम्बभूताभिस्ताभिर्बिम्बभूतस्य परमेश्वरस्य क्रीडां कुर्वतः का दोषप्रसक्तिसंभावनेति भावः । ननु तथापि किमर्थं तथा कृतवानिति चेत् तत्राह ॥ अर्भक इव ॥

तथाच बालकस्य कामक्रोधादिविनिर्मुक्तस्य विहारो यथा लीलामात्रं, तथा भगवतोऽपि सृष्ट्यादिवदिदमपि विहरणं लीलामात्रमिति भावः ॥ १७ ॥

अथ रासक्रीडाविरामहेतुं तासां भगवद्विलासैराकुलेन्द्रियत्वमाह ।

तदङ्गसङ्गप्रमुदाकुलेन्द्रियाः
केशान् दुकूलं कुचपट्टिकां वा ॥
नाञ्जः प्रतिव्योढुमलं व्रजस्त्रियो
विस्रस्तमालाभरणाः कुरूद्वह ॥ १८ ॥

तदिति ॥ तस्याङ्गसङ्गैः प्रकृष्टा या मुत् हर्षस्तया विवशेन्द्रियाः । यत एवमतः केशान् दुकूलं कञ्चुकीं च शिथिलतां गतान्येतानि अञ्जसा प्रतिव्योढुं यथापूर्वं धर्तुं नालं, समर्था न बभूवुः । विस्रस्तानि मालाभरणानि यासां ताः । ननु केशादिशैथिल्ये हेतुभूतां क्रीडां लज्जां विहाय किमिति कर्तुं प्रवृत्ता इत्याशङ्क्याह

व्रजस्त्रियः ॥ नगरस्त्रीणां तादृशः स्वभाव इति भावः । तत्रापि राजवंशोद्भवानां स्त्रीणां तथा प्रवृत्तिर्नोचितेति संबोधनाशयः ॥ १८ ॥

कृष्णविक्रीडितं वीक्ष्य मुमुहुः खेचरस्त्रियः ॥
कामार्दिताः शशाङ्कश्च सगणो विस्मितोऽभवत् ॥ १९ ॥

साक्षाद्भगवता विक्रीडन्तीनां तासां व्याकुलेन्द्रियत्वे किं चित्रं, देवाद्यङ्गनानां तु दर्शनमात्रादेव व्याकुलता सञ्जातेत्याशयेनाह ॥ कृष्णस्य सदानन्दरूपस्य परमात्मनः विक्रीडितमलौकिकं क्रीडनं वीक्ष्य विशेषेणोपलभ्य कामार्दिताः सत्यो देवाद्यो मुमुहुः विकलचित्ता बभुवुः ॥ खेचरस्त्रिय इत्यनेन तत्पतीनां पुरुषत्वाद् गुह्यलीलादर्शनाभावो योगमायया संपादित इति सूचितम् । तत्सर्वमवलोक्य शशाङ्कश्चन्द्रः सगणः ज्योतिश्चक्रेण सर्वेण सहितः विस्मितश्चकितहृदयोऽभवत् । अनेन चन्द्रादिग्रहणां गतिविस्मृतत्वात् कालदैर्घ्यं सूचितम् । तत्रापि योगमायया सर्वाऽपेक्षया यामचतुष्टयात्मिका या रजिनी तस्यामेव क्रीडानुकूलदैर्घ्यं संजातमिति द्रष्टव्यम् ॥ १९ ॥

अथ रासानन्तरं विश्रम्य रहस्यकृतां लीलामाह ।

कृत्वा तावन्तमात्मानं यावतीर्गोपयोषितः ॥
रेमे स भगवाँस्ताभिरात्मारामोऽपि लीलया ॥ २० ॥

कृत्वेति, द्वाभ्याम् ॥ यावत्यो गोपाङ्गनाः तावन्तम् आत्मानं प्रकटीकृत्य ताभिः सह भगवान् शृङ्गाररसलीलया रेमे । रमणं चेदं पृथक् कुञ्जेषु, तत्रैव वा योगमायया विरचितेषु नवीनेषु परस्परमदृश्येषु तदनुकूलप्रदेशेष्विति ज्ञेयम् । अनेन, कात्यायनि महामाये महायोगीन्यधीश्वरि * नन्दगोपसुतं देवि पतिं मे कुरु ते

नमः. इति प्रत्येकं तासां प्रार्थनायाः, याताऽबला व्रजं सिद्धा मयेमा रंस्यथ क्षपाः ॥ इति भगवता दत्तस्य वरस्य च चरिताऽर्थकता बोधिता ॥ २० ॥

अथ तासु भगवतः कृपातिशयमाह ।

तासामतिविहारेण श्रान्तानां वदनानि सः ॥
प्रामृजत् करुणः प्रेम्णा शंतमेनाङ्ग पाणिना ॥२१॥

तासामिति ॥ अत्यर्थं रमणात्मकेन विहारेण, रतिविहारेणेति क्वचित् पाठः । श्रान्तानां वदनानि सः भगवान् प्रामृजत् । तत्रापि स्वहस्तकमलेन । तत्रापि शंतमेन । स्पर्शमात्रेण स्वभावतः सुखकरेण । तत्रापि कान्तोचितप्रेमविशेषेण । यतः करुणस्तत्परिश्रमं द्रष्टुमक्षमः ! पाणिनेति वीजनोपलेपनादेरुपलक्षणम् । तथाच तासां परिश्रममालक्ष्य तद्विहारान्निवृत्तः सन् तथा कृतवानित्यर्थः ॥ २१ ॥

ततः पूर्णाऽखिलमनोरथानां पुनर्मिलितानां तासां प्रहृष्टानां कृत्यमाह ।

गोप्यः स्फुरत्पुरटकुण्डलकुन्तलत्विड्-
गण्डश्रिया सुधितहासनिरीक्षणेन ॥
मानं दधत्य ऋषभस्य जगुः कृतानि
पुण्यानि तत्कररुहस्पर्शप्रमोदाः ॥ २२ ॥

गोप्य इति ॥ स्फुरतां कनककुण्डलानां कुन्तलानां च त्विषा या गण्डश्रीस्तया सुधितेनाऽमृतायितेन सहासावलोकनेन च गोप्यः, ऋषभस्य पत्युर्भगवतो मानं पूजां कुर्वत्यः तस्य कृतानि जगुर्यतः ॥ पुण्यानि ॥ स्फुरादिति तन्वा, सुधितेति मनसा,

जगुरीति वाचेति त्रिविधं प्रहर्षणमुक्तम् । पुनश्च तस्य भगवतो नखस्पर्शेन प्रमोदो यासां ताः ॥ २२ ॥

ततो रासोत्सवान्ते जातमवभृथस्नानमिव जलविहारमाह ।

ताभिर्युतः श्रममपोहितुमङ्गसङ्ग-
घृष्टस्रजः स कुचकुङ्कुमरञ्जितायाः ॥
गन्धर्वपालिभिरनुद्रुत आविशद्वाः
श्रान्तो गजीभिरिभराडिव भिन्नसेतुः ॥ २३ ॥

ताभिर्युतः ॥ तासामङ्गसङ्गेन घृष्टाया मर्दिताया कुसुमस्रजः, अत एव तासां कुचकुङ्कुमेन रञ्जितायाः सम्बन्धिभिः गन्धर्वपालिभिः । गन्धर्वो मृगभेदे स्याद्गायने खेचरेऽपि चेति विश्वप्रकाशाद् गायनश्रेष्ठैर्भ्रमरैरनुद्रुतः स कृष्णः । भगवदङ्गसङ्गेन घृष्टस्रजः । अत एव स्वकुचकुङ्कुमेन रत्यावेशात् प्रसृतेन रञ्जिताखिलदेहास्ताभिर्युतस्तासां श्रमं निराकर्तुं स्वयमपि श्रान्तः सन्, वाः यामुनं जलमाविशत् । श्रान्ततायां हेतुः—भिन्नसेतुः । भिन्नः सेतुर्लीलामर्यादा येन कृतलीलौद्धत्य इत्यर्थः । गजोऽपि विदारितवप्रत्वाद्, श्रान्तः । गजस्यैव वेदं विशेषणद्वयम् । स्वयं चातिक्रान्तलोकवेदमर्यादं इति केचित् ॥ २३ ॥

सोऽम्भस्यलं युवतिभिः परिषिच्यमानः
प्रेम्णेक्षितः प्रहसतीभिरितस्ततोऽङ्ग ॥
वैमानिकैः कुसुमवर्षिभिरीड्यमानो
रेमे स्वयं स्वरतिरत्र गजेन्द्रलीलः ॥ २४ ॥

अङ्ग हे राजन्, सः लीलाविलासचतुरः युवतिभिः जलक्रीडां

कर्तुमतिसमर्थाभिः अम्भसि इतस्ततः सर्वतः जलैः परिषिच्यमानः प्रेम्णेक्षितश्च स प्रेक्षणेनान्तरापि सिच्यमानः । क्वचित् प्रेम्णोक्षित इति पाठः । परिषिच्यमानं प्रेष्ठमवलोक्य प्रकर्षेण हसन्तीभिस्तदानीमपि पुष्पवर्षापरायणैर्विमानस्थितैर्देवादिभिः स्तूयमानः स्वयं साक्षात्पुरुषोत्तमविग्रहो रेमे । तत्र दृष्टान्तः । गजेन्द्रस्येव लीला यस्य । अत्रैवम्भूतरमणकालेऽपि वस्तुतः स्वरतिः । स्वस्मिन्नेव रतिर्यस्य, न बहिः । तथा तादृशरमणं कुर्वतोऽपि भगवतः स्वमहिम्न्येवावस्थानमेवार्थादिति भावः । अत्र गोपीमण्डले, अम्भसि वेत्यन्ये ॥ २४ ॥

स्थलजलक्रीडां वर्णयित्वा वनक्रीडां वर्णयति ।

ततश्च कृष्णोपवने जलस्थल-

प्रसूनगन्धानिलजुष्टदिक्तटे ॥

चचार भृङ्गप्रमदागणाऽऽवृतो

यथामदच्युद् द्विरदः करेणुभिः ॥ २५ ॥

ततो यथोक्तक्रीडानन्तरं च जलस्थलपुष्पाणां गन्धो यत्र तेन वायुना जुष्टानि दिशां तटानि अन्ता यस्मिन् तादृशे यमुनाया उपवने, सौगन्धासक्तानां भृङ्गाणां लावण्यासक्तानां प्रमदानां च गणैरावृतः सन् विचचार विहृतवान् । यथा गजः मदच्युततया भृङ्गगणावृतः करेणुभिश्चावृतस्तद्वत् ॥ २५ ॥

एवं प्रथमरात्रिकृतरासक्रीडामभिधायानुक्तं संस्मरन् अपररात्रिषु तत्प्रकारमतिदिशन्नुपसंहरति ।

एवं शशाङ्कांऽशुविराजिता निशाः

स सत्यकामोऽनुरताऽबलागणः ॥

सिषेव आत्मन्यवरुद्धसौरतः

सर्वाः शरत्काव्यकथारसाश्रयाः ॥ २६ ॥

एवमिति ॥ सः श्रीकृष्णः अनुरक्तस्त्रीकदम्बस्थः, सर्वा अपि शशाङ्कांशुविराजिताः शरदि भवाः काव्येषु कथ्यमाना ये रसास्तेषामाश्रयभूता निशाः सेवितवान् । यद्वा, निशा इति द्वितीया अत्यन्तसंयोगे । तथाभूतासु निशासु शरदि प्रसिद्धाः काव्येषु याः कथास्ताः सिषेवे । सत्यसङ्कल्पस्य भगवतो रमणाधिकरणभूताः सर्वा अपि ता निशाः शशाङ्कांशुविराजिता एव सम्पन्ना इति बोधनाय सत्यकाम इत्युक्तम् । तस्मिन्नभिरमणे तासां नैर्बल्यमेव स्थितमिति सूचनायाऽबलेत्युक्तम् । अत एवात्मन्येवावरुद्धः सौरतः चरमधातुर्न तु स्खलितो यस्येति कामविजयोक्तिः । यद्वा, सर्वाः द्वादशमासिकाः । हायनोऽस्त्री शरत् समा इति कोशात् शरदि संवत्सरमध्ये याः श्रीवृन्दावनीयकृष्णक्रीडाऽधिकरणीभूता आश्रित्य भूतभविष्यद्वर्तमानकविकृतकाव्येषु याः कथाः रसाश्च तेषामाश्रयभूता निशाः सिषेवे । रममाणश्च भगवानात्मन्यवरुद्धसौरतः । आत्मनि मनसि अवरुद्धा अवरुध्य स्थापिताः सौरताः सुरतसम्बन्धिनो भावा बिब्बोककिलकिञ्चितादयः संलापप्रलापादयः चाञ्चल्यौत्सुक्यहर्षादयः स्तम्भस्वेदवैवर्ण्यादयः दर्शनस्पर्शनाश्लेषादयश्च येन सः । यद्वा, एकस्यामेव रजन्यामसंख्याताः स्वयं कल्पिता निशाः स्वसङ्कल्पितशशाङ्कांशुविराजिताः । यतः सत्यसङ्कल्पः । समानमन्यत् ॥ २६ ॥

भगवत्कृतां रासलीलाम् आकर्ण्य सर्वसन्देहनिवृत्तये राजा पृच्छति ।

राजोवाच ॥

संस्थापनाय धर्मस्य प्रशमायेतरस्य च ॥
अवतीर्णो हि भगवानंशेन जगदीश्वरः ॥ २७ ॥

धर्मेति ॥ परित्राणाय साधूनाम् इत्युक्तत्वाद् धर्मस्य सम्यक् स्थापनायेतरस्याऽधर्मस्य च प्रकर्षेण शमनाय भगवान् जगदीश्वरोंऽशेन बलदेवेन सहावतीर्ण इति प्रसिद्धम्। भगवानिति पदेनाऽन्यथा पूर्णकामस्यावतरणं न घटत इति सूचयति । युक्तं चैवं भगवतो जगत्परिपालनमिति द्योतनाय जगदीश्वर इत्युक्तम् । यद्वा, अंशेन जगदीश्वरः । तदुक्तं– विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति ॥ २७ ॥

स कथं धर्मसेतूनां वक्ता कर्त्ताऽभिरक्षिता ॥
प्रतीपमाचरद् ब्रह्मन् परदाराभिमर्शनम् ॥ २८ ॥

एवम्भूतः सः, धर्म्मसेतूनां तत्प्रतिपादकवेदादीनां वक्ता । तत्रापि, न केवलं वक्ता किन्तु तत्कर्ता तत्प्रतिपादकशास्त्रस्य निर्माता च । किञ्च तदुक्ताऽऽचरणेन तद्विरुद्धवादिनिराकरणेन तत्प्रतिपक्षबलवधादिना च रक्षिता पालकश्च, कथं प्रतीपं धर्मसेतूनां प्रतिकूलं परदाराभिमर्शनरूपं साहसमधर्म्ममाचरत्।न केवलं कलञ्जभक्षणादिवदधर्म्ममात्रमित्यर्थः। नन्वीशाचेष्टितं कथं मया ज्ञातुं शक्यमिति चेत् तत्राह ॥ हे ब्रह्मन् वेदमूर्ते सर्वज्ञ, तदभिन्नेति वा ॥ २८॥

नचाप्तकामस्य भगवतो नाधर्मसंस्पर्श इति चेत् तत्राह ।

आप्तकामो यदुपतिः कृतवान् वै जुगुप्सितम् ॥
किमभिप्राय एतन्नः संशयं छिन्धि सुव्रत ॥२९॥

आप्तकाम इति ॥ यद्याप्तकामस्तर्हि सुतरामिदं जुगुप्सितं कर्म

कृतवान् । तथाचाप्तकामस्यावतारावस्थायां यदूनां परमधार्म्मिकाणां पत्युरेवंविधं कर्म निन्दितमेव । ननु किमेवं परमेश्वरे दोषमुद्भावयितुं प्रवृत्तोऽसीत्याशङ्क्य, नाहं तस्मिन् दोषमुद्भावयामि, किन्तु तदाचरणे तस्याभिप्रायं पृच्छामीत्याह ॥ किमिति ॥ किमभिप्रायः कृतवान् एतन्नोऽस्माकं सर्वेषां संशयं छिन्धि । न इति करचालनेन संशयाक्रान्ततां दर्शितवान् । यथा ब्रह्मचर्य्यादिसुव्रतैर्भवद्भिस्तत्प्रतीपाचरणं न क्रियते तद्वत्तस्यापि तदकरणं शोभनमिति संबोधनाशयः । यद्वा, हे संशयच्छेदनलक्षणसुव्रत ॥२९॥

ईश्वराणामपि दृष्टेन धर्म्मव्यतिक्रमेण साहसेन च दोषाभावनिश्चयात् परमेश्वरे कुतस्तच्छङ्कोत्थानमिति कैमुत्यन्यायेन परिहर्तुं सामान्यत ईश्वराणां वृत्तमाह ।

श्रीशुक उवाच ॥

धर्मव्यतिक्रमो दृष्ट ईश्वराणां च साहसम् ॥
तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा ॥३०॥

धर्म्मेति ॥ ईश्वराणां प्रजापतीन्द्रचन्द्रविश्वामित्रादीनां धर्म्मस्य व्यतिक्रम उल्लङ्घनं, तथा साहसं सहसा प्रवृत्तिरधर्माचरणं च दृष्टं, तत् तेजीयसां न दोषाय, प्रत्यवायाय न भवति । यथा च वह्नेः सर्वभुजः सर्वभुक्तं दोषावहं न भवति तद्वत् ॥ ३० ॥

नन्वेवं तर्हि यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जन इति न्यायादितरस्यापि तदनुष्ठानं दोषावहं न भविष्यतीति, तत्राह ।

नैतत् समाचरेज्जातु मनसापि ह्यनीश्वरः ॥
विनश्यत्याचरन्मौढ्याद्यथा रुद्रो जुषन् विषम् ॥ ३१ ॥

नेति ॥ इतरस्तु एतन्मनसाऽपि कदाचिदपि न समाचरेत् ।

वाचा देहेन समाचरेदिति किमु वक्तव्यम् । हि यतः अनीश्वरः देहादिपरतन्त्रः । विपक्षे बाधकमाह ॥ मौढ्यात् सामर्थ्यासामर्थ्य-विवेकराहित्याच्चद्रुद्राचरन् मनः विशेषेण नायश्नः । यथा रुद्रव्यतिरिक्तो विषं जुषन् भक्षयन् विनश्यति तद्वत् ॥ ३१ ॥

ईश्वराणां वचः सत्यं तथैवाचरितं क्वचित् ॥
तेषां यत् स्ववचो युक्तं बुद्धिमाँस्तत् समाचरेत् ॥ ३२॥

तस्मादीश्वराणां वचः सत्यं सर्वथाऽनुल्लङ्घनीयम् । तर्हि सदाचारः प्रमाणमिति घण्टाघोषस्य का गतिरिति चेत् तत्राह ॥ तथैवेति ॥ क्वचित् तेषामाचरितमपि तथैव सत्यम् । तत्किमित्यपेक्षायामाह ॥ तेषां यदाचरितं तेषां वचसा युक्तं तदेव बुद्धिमान् सम्यगाचरेदन्यथा निर्बुद्धिर्भवेत् । तथाच धर्म्मबुद्ध्या सद्भिर्यदनुष्ठितं तदेव प्रमाणतयोपादेयं, न सर्वमित्यर्थः ॥ ३२ ॥

ननु तेऽपि स्ववचोऽनुरूपं कुतो नाचरन्ति इत्याशङ्क्य स्ववचसो विधिनिषेधरूपत्वात्, तेषां च तदप्रयोज्यत्वाच्च स्ववचनानुसरणमित्याशयेनाह ।

कुशलाचरितेनैषामिह स्वार्थो न विद्यते ॥
विपर्यये न चानर्थो निरहंकारिणां प्रभो ॥ ३३ ॥

कुशलेति ॥ तथाचोक्तं भगवता- नैव तस्य कृतेनाऽर्थो नाकृतेनेह कश्चन * इति । यतस्ते निरहङ्कारिणः । तदुक्तं- यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते * इति । तथाच तेषां तथा प्रवृत्तिरेतच्छास्त्रसार्थक्यमिति भावः । यथा प्रभोस्तव न नामरूपनियमबन्धना तद्वत्तेषामपि नास्ति विधिनिषेधनियमबन्धनेति संबोधनाशयः ॥ ३३ ॥

किमुताखिलसत्त्वानां तिर्यङ्मर्त्यदिवौकसाम् ॥

ईशितुश्चेशितव्यानां कुशलाकुशलान्वयः ॥ ३४ ॥

तथाच यथोक्तरीत्या यदैवं तदा तिर्यगाद्यखिलसत्त्वानां नियम्यानामीशितुर्नियामकस्य सर्वकर्मणां यथायथं फलप्रदस्य स्वतन्त्रस्य परमात्मना नियम्यानां कुशलाकुशलाभ्यामन्वयो नियम्यतारूपः संबन्धः कुतः । सर्वथा न विद्यते इत्यर्थः ॥ ३४ ॥

किञ्च जीवानामपि तदनधिकारिणां नास्ति कर्मबन्धो यदा परमेश्वरस्य कुतस्तत्संभव इत्याह ।

यत्पादपङ्कजपरागनिषेवतृप्ता
योगप्रभावविधुताऽखिलकर्मबन्धाः ॥
स्वैरं चरन्ति मुनयोऽपि न नह्यमाना-
स्तस्येच्छयात्तवपुषः कुत एव बन्धः ॥ ३५ ॥

यदिति ॥ यस्य भगवतः पादपद्मयोः परागाणां कान्तिलक्षणरेणूनां नितरां सेवनेन ध्यानादिना तृप्ता अन्यत्र जाताऽलम्प्रत्यया यत्पादपङ्कजपरागेषु निषेवो येषां ते च ते तृप्ताश्चेति वा । एवम्भूता भागवतप्रधानास्तथा ज्ञानयोगप्रभावेण विधुता निराकृता अखिलकर्मणां बन्धो येषां ते तत्त्वज्ञा मुनयोऽपि न नह्यमानाः कर्मभिरबध्यमानाः स्वैरं विधिनिषेधककर्म्मविनिर्मुक्ताश्चरन्ति तस्ये स्वेच्छया स्वीकृतनरदेहस्य परमेश्वरस्यैव कुतो बन्धः । सर्वथाऽपि तत्र नाऽऽशङ्कनीयमित्यर्थः । यद्वा, यद्भक्त्या लब्धज्ञाना मुनयोऽपीति व्याख्येयम् ॥ ३५ ॥

एवं गोपीनां परदारत्वं तदभिमर्शनजन्यदोषं चाङ्गीकृत्य समाहितम् । वस्तुतस्तु नास्ति तासां परदारत्वमतो नास्ति तत्सेवाकृतदोषगन्धोऽपीत्याह ॥

गोपीनां तत्पतीनां च सर्वेषामेव देहिनाम् ॥
योऽन्तश्चरति सोऽध्यक्षः क्रीडनेनेह देहभाक् ॥३६॥

गोपीनामिति ॥ यः गोपीनां तत्पतीनां च, किञ्च, सर्वेषामेव देहिनामन्तर्जीवरूपेणाऽन्तर्यामिरूपेण चरति स एवाध्यक्षस्तद्देहादिनियन्ता क्रीडनेन क्रीडार्थं देहभाक् गृहीतलीलाविग्रहो, न त्वऽस्मदादिवत् कर्मभोगाद्यर्थं देहभाक् । अतो नास्ति तत्र दोषगन्धस्य शङ्कापीति भावः ॥ ३६ ॥

नन्वस्त्वेवं, तथापि लोकदृष्ट्या निन्दितस्य कर्मणोऽनुष्ठाने भगवतः कोऽभिप्राय इति चेत् तत्राह ।

अनुग्रहाय भूतानां मानुषं देहमास्थितः ॥
भजते तादृशीः क्रीडा याः श्रुत्वा तत्परो भवेत् ॥३७॥

अनुग्रहायेति ॥ भूतानां संसारिणामनुग्रहाय मानुषदेहमास्थितः । अतस्तादृशीः क्रीडा भजते याः श्रुत्वा तत्परः स्वक्रीडानुसन्धानपरो भवेत् । तथाच शृङ्गारसाकृष्टचेतसोत्पन्नबहिर्मुखा अपि मत्परा भूत्वा उद्धृताःस्युरित्यभिप्रायेण तदाचरणमिति भावः॥३७॥

नन्वेवं प्रवृत्ते भगवति तत्पतीनामसूया कथं नोत्पन्नेत्याशङ्क्याह ।

नासूयन् खलु कृष्णाय मोहितास्तस्य मायया ॥
मन्यमानाःस्वपार्श्वस्थान् स्वान् स्वान् दारान् व्रजौकसः ३८

नेति ॥ व्रजौकसां तत्पतयः कृष्णाय नासूयन् यतस्तस्य योगमायया मोहिताः । ननु कोऽसौ मोहो मूर्च्छारूपः किं वाऽन्यथा भावरूप इत्यपेक्षायामाह ॥ स्वस्वान् दारान् स्वपार्श्वस्थान् मन्यमानाः । एतेनान्येऽपि भिन्नाचाराः स्वचेष्टितमेव वदन्तीत्याशङ्कापि निरस्ता । यथोक्तैश्वर्यरहितानामन्यथाचरणे पापिष्ठत्वापग-

मात् । तस्मात्, न देवचरितं चरेदित्युक्तत्वादेवंविधा प्रवृत्तिर्न कस्यापि मनुष्यस्य भवतीति भावः ॥ ३८ ॥

इतः परं संशयमनुचितं मन्यमानः खिन्नचित्तः श्रीशुको रासक्रीडावर्णनमुपसंहरति ।

ब्रह्मरात्र उपावृत्ते वासुदेवाऽनुमोदिताः ॥
अनिच्छन्त्यो ययुर्गोप्यः स्वगृहान् भगवत्प्रियाः ॥३९॥

ब्रह्मरात्रे इति ॥ ब्रह्मरात्रौ समासान्त आर्षः । सत्यसङ्कल्पस्य भगवतः सङ्कल्पवशात् यामचतुष्टयात्मिकायां रजन्यां सहस्रयुगपरिमिते यथोक्तलीलानिर्वाहके काले उपावृत्ते सम्यग् एकाम् आवृत्तिं गते सति । नचात्र विस्मयः कार्यः । भगवद्योगमायया सर्वसम्भवात् । तथाच यथा वृन्दावनस्य कस्मिँश्चित् प्रदेशे असंख्यातानि ब्रह्माण्डानि प्रतिष्ठितानि ब्रह्मणा दृष्टानि । यथा वा बाल्ये स्थितस्य स्वल्पस्य स्वोदरस्योपर्य्यपरिमितानि दामानि बद्धान्यऽवलोकितानि व्रजौकोभिः । यथा वा भगवन्मुखे चतुर्दशभुवनानि दृष्टानि श्रीयशोदया । तथा स्वल्पदेशे क्रीडायोग्यदेशस्य स्वल्पे काले तद्योग्यकालस्य चानुभवे नास्ति किञ्चिदपि चित्रम् । ब्रह्मरात्रेर्ब्राह्मे मुहूर्ते उपावृत्ते सतीत्यनेन वासुदेवेनाऽनुमोदिताः । वासुदेवपदेनान्तरवस्थितेन तेन तासामन्तरगमनोद्योगं स्वयमेवोत्पाद्य बहिरप्यनुमोदिताः । अत एवानिच्छन्त्योऽपि स्वगृहान् ययुः । भगवानेव प्रियो यासां ताः । तथाच गमनागमनाभ्यां भगवत्प्रियमेव यासां सम्पाद्यमिति भावः । यद्वा स्वगृहान् प्रति गता अपि भगवतः प्रीतिविषया एवेति भावः ॥ ३९ ॥

अथ भगवतः कामविजयरूपसर्वलीलावतंसरासक्रीडाश्रवणादेर्यथायोग्यपरमोत्कृष्टं फलमाह ॥

विक्रीडितं व्रजवधूभिरिदं हि विष्णोः
श्रद्धान्वितोऽनुशृणुयादथ वर्णयेद् यः ॥
भक्तिं परां भगवति प्रतिलभ्य कामं
हृद्रोगमाश्वपहिनोत्यचिरेण धीरः ॥ ४० ॥

इति श्रीभागवते महापुराणे दशमस्कन्धे रासक्रीडा-
नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

विक्रीडितमिति ॥ इदं मया वर्णितं व्रजवधूभिर्विष्णोः पूर्ण-स्य क्रीडानुरूपरूपाणि प्रकटीकृत्य विविधं क्रीडितं श्रद्धान्वितः सर्वलोकोद्धारार्थमाप्तकामेन भगवतेदं विक्रीडनं कृतमिति विश्वास-युक्तः योऽनु निश्चयेन संशयकलङ्करहितः शृणुयात् अनुदिनं वा शृणुयात् । अथ तथा यः कीर्तयेत् स भगवति परां प्रेमलक्ष-णां भक्तिं प्रतिलभ्य भगवदनुग्रहादचिरेण धीरस्तत्त्ववित् सन् हृ-द्रोगं सर्वानर्थभूतं काममाशु शीघ्रमपहिनोति परित्यजति । तथाच सर्वानर्थनिवृत्तिपरमानन्दप्राप्तिरूपपरमपुरुषार्थफलकोऽयं पञ्चाध्या-यात्मको ग्रन्थः परमादरेण श्रोतव्यो वर्णयितव्यश्चेति भावः ॥४०॥

श्रुतिगोपाङ्गनाभिर्यः क्रीडते सत्सु मानसे ॥
वने तं धनपत्याख्यो नौमि कृष्णं परात् परम् ॥ १ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यबालगोपालतीर्थश्रीपाद-
शिष्यदत्तवंशावतंसरामकुमारसूनुधनपतिसूरिकृतायां
श्रीमद्भागवतगूढार्थदीपिकायां दशमस्कन्धे
त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

BENARES SANSKRIT SERIES;

A
COLLECTION OF SANSKRIT WORKS
EDITED BY THE
PANDITS OF THE BENARES SANSKRIT COLLEGE,
UNDER THE SUPERINTENDENCE OF
G. THIBAUT, PH. D

Nos. 131, 142 & 146.

श्रीमद्भागवतदशमस्कन्धस्थरासपञ्चाध्यायीव्याख्या।

गूढार्थदीपिका।

पण्डितवर–श्रीधनपतिसूरिकृता।
रसव्याख्या च।

श्रीमदाचार्यश्रीवल्लभाधीश्वर–श्रीविट्ठलनाथदीक्षितशुद्धाद्वैत-
संप्रदायविदुषा रत्नगोपालभट्टेन परिशोधिते।

GÛḌHÂRTHADÎPIKÂ,

A Commentary on Râsa Panchâdhyâyî
of the Tenth Chapter of Ŝrîmad Bhâgawata,
BY PAṆḌIT DHANAPATI SÛRI;

And RASAVYÂKHYÂ.

Edited By Ratna Gopâl Bhaṭṭa.

BENARES:
Published by the Proprietors Messrs. Braj B. Das & Co.
AND SOLD BY H. D GUPTA,
Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidyâ Vilâs Press
By Harikrishna Dasa.
BENARES.

1908.

श्रीगणेशाय नमः ।

श्रीमद्भागवतीय–जन्माद्यस्येत्याद्यश्लोकविवृतिः ।

रसव्याख्या ।

विद्वद्वरश्रीजगन्नाथसुधीविनिर्मिता ।

अथ कलिमलकलुषीकृतचित्तानां कलियुगोत्पन्नानां जनानामञ्जसा श्रेयस्समधिगन्तुकामानां तत्प्राप्तये परमकारुणिको भगवान् बादरायणो भगवद्गुणवर्णनप्राधान्येन परमधर्म्मप्रतिपादकं श्रीमद्भागवतं पुराणम्प्रारिप्सुस्तत्प्रतिपाद्यं सत्यात्मकं परमधर्म्मं ध्यायन् ग्रन्थसमाप्तिप्रचयगमनाभ्यामन्यानुपशिक्षयन्नादौ मङ्गलमाचरति ।

ॐ जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञस्स्वराट्
तेने ब्रह्महृदा य आदिकवये मुह्यन्ति यत्सूरयः ॥
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥ १॥

ॐ जन्मेति ॥ अत्रेत्थं व्यवस्था । कृतयुगे साङ्गश्चतुष्पाद्धर्मः त्रेताऽऽदिषु क्रमेण पादशो हीनत्वात् कलौ धर्म्मपादः सत्यमेवाऽवशिष्यते । पादास्तु– तपः शौचं दया सत्यमिति पादाविभोर्नृपेति । इदानीं धर्म्मपादस्ते सत्यं निर्वर्तयेद्यत इति चात्रैव वक्ष्यति । तच्च मुख्यं सत्यं भगवता निर्णीतम् । सत्यञ्च समदर्शनमिति । समशब्दो ब्रह्मवचनः । निर्दोषं हि समं ब्रह्मेति च भगवद्-

वचनात् । तस्य चाऽतिदुष्करत्वात् तत्साधनत्वेन वेदविद्भिः सत्यं परिभाषितम् । तथाहि पाद्मे । दृष्टानुभूतमर्थञ्चेदिष्टानिष्टं न गूहते * यथा भूतमवादो हि इत्येतत् सत्यलक्षणम् । तथा सत्यप्रतिपादकत्वात् सत्यविषयत्वात् सत्यप्रापकत्वाच्च नामसङ्कीर्तनादि भगवद्भजनमेव सत्यम् । अतो द्वापरान्ते पुराणविभागात् कलियुगोत्पन्नानामेवोपकारकत्वं मुख्यमभिप्रेत्य सत्यप्रधानत्वमेवास्य पुराणस्य युक्तम् । अन्येषां ज्ञानादीनां युगान्तरीयाधिकारविषयत्वेनात्राप्युदाहरणत्वेनेदानीन्तनानां प्रायशोऽनधिकारित्वाच्चानुवादरूपत्वं संगच्छते । तथा ह्यत्रैव प्रतिज्ञायामनन्तरपद्ये, धर्म्मः प्रोज्झितकैतवोऽत्र परम इत्यादि । अन्यत्र च, रामेति वर्णद्वयमादरेण सदा स्मरन्मुक्तिमुपैति जन्तुः * कलौ युगे कल्मषमानसानामन्यत्र धर्म्मे खलु नाधिकारः ॥ हरेर्नामैव नामैव नामैव मम जीवनम् कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥ कीर्त्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेदित्यादि । तथाच मनुः, सत्यं ब्रूयात् प्रियं ब्रूयान्न ब्रूयात् सत्यमप्रियम् * प्रियञ्च नानृतं ब्रूयादेष धर्म्मः सनातनः ॥ इत्यादि च शतशः प्रमाणानि सन्ति । तेनेत्थं व्याख्या सम्भवति । यथा— सत्यं सत्यात्मकं धर्मं धीमहि ध्यायेम । तत्रैवोभयविधसत्यात्मके धर्म्मेऽस्माकं चित्तवृत्तिरस्तु । सत्यस्य समानाधिकरणं विशेषणद्वयम् । यथा, परं सर्वधर्म्मोत्कृष्टम् । तथाच गायत्रीभाष्ये, नास्ति सत्यात् परो धर्म्मो नानृतात् पातकं परम् * न गायत्र्याः परो मन्त्रो न देवः केशवात् पर इत्यादि । पुनः धाम्ना स्वेन सदा निरस्तकुहकम् ॥ स्वेन धाम्ना स्वरूपेण प्रभावेन वा, सदा कालत्रयेऽपि निरस्तकुहकम् । निरस्तः कुहको माया यस्मिन् येन वा तत् । एवञ्च सप्तभिर्व्यधिकरणविशेषणैः सत्यस्य परमत्वं स्फुटयति ॥ जन्माद्यस्य यतोऽन्वयादिति ॥ यतो

यस्य सत्यस्य अन्वयात् संबन्धात् अस्य श्रीवासुदेवस्याऽपि जन्मादि श्रीमूर्तिप्रादुर्भावो, मनुष्यनाट्यञ्च, भवतीति शेषः । अनेन भगवद्वशीकरणत्वं भगवत्प्रापकत्वञ्चास्य सत्यस्योक्तम् । वक्ष्यति च, सत्यव्रतं सत्यपरं त्रिसत्यमित्यत्र । चः समुच्चये । पुनः, स्वराट् ॥ स्वेन स्वयमेव राजते, न तु द्रव्यदेशादिसाधनैः । अनेन पूर्णत्वं सुसेव्यत्वञ्चोक्तम् । पुनः, यः सत्यात्मको धर्म्मः कवये स्वनिपुणाय, ब्रह्महृदा वेदरहस्येन, उपासनया सह, आदि सर्वकारणकारणं ब्रह्म तेने प्रकाशितवान् स्वनिष्ठेभ्यः । एतेन भूतनिर्देशेनाऽस्य प्रमाणसिद्धत्वमुक्तम् । नाऽस्त्यत्र प्रमाणाऽन्तरापेक्षा ऐतिह्यस्यापि प्रमाणत्वात् । कथम्भूतम् ॥ आदि ॥ यत आदि प्रति सूरयो मुह्यन्ति तत् । अनेनाऽलभ्यप्रापकत्वमुक्तम् । पुनः, इतरतः । षष्ठीबहुवचने तासिल् । इतरेषां सकामानाम् अर्थेषु प्रयोजनेषु धर्म्माऽर्थकामेषु अभिज्ञः । तद्दातृत्वेन निपुणः । अनेन चतुर्वर्गप्रदत्वेन सर्वोपकारकत्वं सर्वसेव्यत्वञ्च दर्शितम् । पुनः यत्र यस्मिन् सत्ये सति त्रिसर्गस्त्रयाणां तपःशौचदयानां सर्गो विस्तारः अमृषा सत्यम् । यथा तेजोवारिमृदां सर्गो विस्तारः सत्ये सत्येव अविनिमयो भवति व्यावहारिकसत्यतापन्नो भवति तथेति दृष्टान्तः । सत्याभावे तपआदीनां दम्भहेतुत्वेनानर्थप्रापकत्वात् । एवं यत्तदोर्नित्यसंबन्धत्वेन तं सत्यात्मकं धर्म्मं धीमहीति योज्यम् ॥ १ ॥

यद्वाऽनेन पद्येन वर्णनीयस्यास्य महापुराणस्य दशलक्षणत्वं स्मरन्, तेषु च नवभिर्लक्षणैर्लक्षितं श्रीवासुदेवं समग्रग्रन्थगोचरं ध्यायन् मङ्गलमाचरति ॥ जन्मेति ॥ तानि च द्वितीये वक्ष्यमाणानि । यथा, अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः मन्वन्तरेशाऽनुकथा निरोधो मुक्तिराश्रयः ॥ दशमस्य विशुद्ध्यर्थं

नवानामिह लक्षणम् । वर्णयन्ति महात्मानः श्रुतेनाऽर्थेन चाञ्जसा इति ॥ यतः ॥ चतुर्थीस्थाने तसिल् । यस्मै यं श्रीवासुदेवमनुकूलयितुं ज्ञातुं वा । सति शोभनेऽत्र पुराणे, आद्यस्य महदादिकरणवर्गस्य जन्म वर्ण्यते इति शेषः । तेन भूतमात्रेन्द्रियधियाँ जन्मसर्ग उदाहृत * इत्युक्तलक्षणः सर्गो वर्ण्यते इत्यर्थः । चेति समुच्चये । पुनः, अन्वयादितरः । अन्वयो वंशविस्तारस्तस्यादिर्ब्रह्माऽन्वयादिरतिशयेनान्वयादितरः पुरुषावतारः । विसर्गो वर्ण्यते । विसर्गः पौरुषः स्मृत इति । पुनः, अर्थेषु तत्तल्लोकपालनेषु प्रयोजनेषु अभिज्ञो निपुणस्तत्तल्लोकपालो वर्ण्यते । स्थितिर्वैकुण्ठविजय इति । पुनः स्वराट् ॥ स्वे भक्ता राजन्तेऽनेन । स्वै राजते इति वा । स्वराट् । अनेन पोषणं वर्णितम् । पोषणं तदनुग्रह इति । पुनः, ब्रह्म वेदं तज्जन्यज्ञानं वाहरतीति ब्रह्महृत् । वासना ऊतिपदवाच्या वर्णिता । ऊतयः कर्म्मवासना इति । यत् यस्मिन् सूरयो विद्वांसोऽपि मुह्यन्ति । अर्थात् सद्धर्म्मो मन्वन्तरपदवाच्यो वर्ण्यते । मन्वन्तराणि सद्धर्म्म इति । पुनः, यैर्भगवदवतारैस्तद्भक्तैश्च तेजोऽवारि भवसिन्धुशोषणं कर्म्म स्वीकृतं ते च ईशा वर्ण्यन्तेऽर्थात्तेषां कथा इत्यर्थः । अवतारानुचरितं हरेरस्यानुवर्तिनाम् * पुंसामीशकथाः प्रोक्ता नानाख्यानोपबृंहिता इति । पुनः यत्र निरोधे मृदां मर्दयन्ति पीडयन्ति भूतानीति मृदो दुष्टराजानस्तेषां यथा यथावद्विनिमयो विनाशो निरोधपदार्थो वर्णितः । निरोधोऽस्यानुशयनमात्मनः सहशक्तिभिरिति । यत्रेति पदमुभयत्र सम्बध्यते । यत्र यस्यां मुक्तौ त्रयाणां गुणानां सर्गोऽमृषा वा मृषा भवति सा मुक्तिर्वर्ण्यते । मुक्तिर्हित्वान्यथा रूपं स्वरूपेण व्यवस्थितिरिति । पुनः, स्वेन धाम्ना सदानिरस्तकुहकं ब्रह्म श्रीवासुदेवः । आश्रयपदार्थो वर्ण्यते । आभासश्च निरोधश्च यतश्चा-

ऽध्यवसीयते * स आश्रयः परं ब्रह्म परमात्मेति शब्द्यते इति तम् अं श्रीवासुदेवं धीमहीति सम्बन्धः। अस्यैव समानाधिकरणविशेषणं—परमिति॥ चतुर्व्यूहनवव्यूहोपास्येषु श्रेष्ठम्। व्यधिकरणविशेषणद्वयम्॥ आ इति॥ आसतेऽस्मिन् भूतानीति। आः। क्विबन्तस्यास्ते रूपम्। पुनः यः श्रीवासुदेवः कवये उपासकाय आदि सर्वकारणं स्वरूपं ब्रह्म तेने प्रकाशितवान्। एतेन वासुदेवस्मरणेनाऽस्य वाचकस्य द्वादशाक्षरमनोर्विवरणरूपमिदं पुराणं, तेनैव च मन्त्राक्षरसमसंख्यस्कन्धकल्पनञ्च प्रतीयते इति॥ १॥

यद्वा, न पूज्यते गुरुर्यत्र नरैस्तत्राफला क्रिया इति स्मृतेः, यस्य देवे परा भक्तिर्यथा देवे तथा गुराविव्यादिश्रुतेश्च भगवान् वेदव्यासोऽन्यानुपशिक्षयन् स्वयमपि स्वगुरुं श्रीनारदं नमस्यँस्तदनुस्मरणात्मकं मङ्गलमाचरति॥ जन्मेति॥ यः श्रीनारदः, आदिकवये श्रीवाल्मीकये, हृदा नमस्कारमात्रेणैव ब्रह्म श्रीरामस्वरूपं तेने तं धीमहि। अनेन स्वगुरोः परमकृपालुना बोधिता। कथम्भूतो यः, जन्माद्यस्य यतोऽन्वयात्। यतो यस्य श्रीनारदस्यान्वयात् सन्ततेरस्य वर्णनीयत्वेनोपस्थितस्य श्रीभागवतपुराणस्य जन्मादि। जन्म आदिर्यस्यास्तित्वलक्षणस्य तज्जन्मादि भविष्यतीति शेषः। नित्यस्यापि श्रीभागवतस्य लोकेऽस्मिन्नप्रसिद्धत्वात् प्रादुर्भावमात्रं मत्तो भविष्यतीत्यर्थः। स्वगुरोः सर्वज्ञतामाह, पदाभ्याम्॥ इतरतः, अर्थेष्वभिज्ञ इति॥ इतं ज्ञानं तत्र रतः प्राप्ताऽनुरागो विषयवैतथ्यदर्शनात्। ज्ञानञ्च शास्त्रीयम्। यथाह—परोक्षमपरोक्षञ्च ज्ञानं द्विविधमिष्यते * परोक्षमास्थिरं प्रोक्तमपरोक्षं तु सुस्थिरम्॥ हेतूपदेशगम्यञ्च परोक्षं तत् प्रचक्षते। अपरोक्षं पुनः श्रेष्ठादनुष्ठानात् प्रजायते इति। तत्र परोक्षज्ञानं दर्शितमपरोक्षमाह॥ अर्थेष्वभिज्ञ इति॥ अर्थो वस्तु परमात्मा तस्मिन्नित्ष्वभिज्ञः।

यथा धनुर्धरो जनो लक्ष्यवेधनार्थमिषुप्रयोगं चिरमभ्यस्य इष्व-भिज्ञो भवति, तथा श्रीनारदोऽपि बहुजन्मसु भगवति लक्ष्ये मन-इषुमभ्यस्य इदानीं तथा जात इति । तज्ज्ञापकं तस्य परमानन्द-त्वमाह ॥ स्वराडिति ॥ स्वरैर्निषादर्षभादिभिः सहाऽटतीति । अत एव, विनिमयः ॥ परिदानं परीवर्तो नैमेयनिमयावपीत्यमरः । विगतो निमयो विपर्य्यासो यस्य सः । अनेनास्य सर्वदाऽद्वया-वस्थानमुक्तम् । एतदेव स्फोटयति ॥ यत्र यस्मिन् श्रीनारदे त्रि-सर्गो मृषा त्रयाणां जाग्रदादीनां सर्गः स्वभावो मृषा । सदा स-माहितत्वात् । यच्छब्दानां तदा(१) सम्बन्धः । तं परं भगवद्भक्तेषु श्रेष्ठं सत्येऽभिनिविष्टत्वाच्च सत्यं धीमहि । निर्गुणस्य ब्रह्मणो रामस्वरूपत्वाय तं विशिनष्टि ॥ यथा येन श्रीरामस्वरूपेण ब्रह्म-णा. मृदां मर्दयन्तीति मृदो रावणादयो राक्षसास्तेषां तेजोऽवारि स्वीकृतं नाशितं वा । ननु तादृशानां नाशायेच्छामात्रमेवालं कि-मिति प्राकृतसदृशेन रूपेणेत्यत्राह ॥ धाम्ना स्वेन सदा निरस्त-कुहकम् ॥ स्वेन धाम्ना श्रीरामविग्रहेण सतां साधूनाम् । आ सम्यग् निरस्तः कुहको येन तत् । एतेन, परित्राणाय साधूनां विनाशाय च दुष्कृताम् * धर्मसंस्थापनार्थाय सम्भवामि युगे युगे इति स्वप्रतिज्ञा निष्पादिता । कथम्भूतास्ते ॥ मुह्यन्ति यत्सूरयः ॥ यत्र येषु मृत्सु सत्सु सूरयो विवेकिनोऽपि मुनयो मुह्यन्ति । व-र्तमाननिर्देशेनाद्यापि तत्तुल्यै राजसतामसस्वभावैर्मुह्यन्तीति प्रत्यक्षं ज्ञापितम् । अत एव तादृशस्य श्रीरामचन्द्रस्य नामकर्म्माऽऽदि-कीर्त्तनैरद्यापि ते नश्यन्तीति ॥ ३ ॥

यद्वाऽनेन पद्येन सर्वेषां भगवद्भगवदीयानां पदार्थानां स्व-रूपं नमस्कुर्वन् वक्तव्यत्वेन च हृदि ध्यायन् मङ्गलमाचरति ॥

(१) तदा=तच्छब्देन ।

जन्मेति ॥ यतो याभ्यां देवकीवसुदेवाभ्यां यत्र येषु च स्थानेषु मथुरागोकुलवृन्दावनद्वारकादिसंज्ञेषु, अस्य सर्वकार्यैककारणात्मकस्याखण्डस्वरूपस्य । यद्वा, अकारो वासुदेवः स्यादित्येकाक्षरात्, श्रीवासुदेवस्य वस्तुतो जन्मादिशून्यस्यापि जन्मादि अभूदिति शेषः । आदिशब्देन वृद्धिस्थितिबाल्यकौमारादिस्वर्गारोहणान्ता लीला गृह्यन्ते । अनु पश्चाज्जन्मानन्तरं यश्च श्रीवासुदेवो यन्मिथुनं नन्दयशोदारूपम् । अयात् अगमत् । यत्र च यासु लीलासु स्वेन धाम्ना तत्तदधिकारिषु अधिकारतारतम्यतः क्वचिन्निर्गुणसच्चिदानन्दकन्दसन्दोहरूपेण, क्वचित् कोटिकन्दर्पदर्पपरिमर्दनसुन्दरेण श्रीविग्रहेण ब्रह्म ब्रह्मानन्दं तेने । तच्च ताश्च धीमहीति सर्वेषां यच्छब्दानां लिङ्गसमन्वयेन तदा सम्बन्धः । आनन्दं विशिनष्टि ॥ सदा निरस्तकुहकम् ॥ सतां कृष्णक्रीडाकथादिपराणाम् । आ सम्यङ्निरस्तं कुहकमज्ञानं येन तत् । तथा सत्यविषयत्वात् सत्यप्रापकत्वाच्च सत्यम् । परं सर्वसुखाश्रयम् । यदपेक्षयान्यस्य सुखस्य समत्वमधिकत्वञ्च नास्तीत्यर्थः । अत एव तदा तेषां त्रिसर्गस्त्रिविधो भूतेन्द्रियदेवतारूपः सर्गो, मृषा मिथ्याऽभूत् । देहेन्द्रियाध्यासाभावेन सदा समाहितत्वात् । केषाञ्चित्तु अमृषा सत्यं वाऽभूत् ।

ताश्च लीलाः क्रमेण निर्दिशति ॥ यः श्रीकृष्ण इतरेषां बहिर्मुखाणां पूतनादीनामपि, अर्थेषु यथाधिकारं भोगमोक्षलक्षणेषु अभिज्ञो निपुणः स्वयं सम्पादक इत्यनेन राजसतामसदैत्यादिभूभारक्षपणलीला, परमदयालुता च निरूपिता । पुनः, स्वराट् ॥ स्वाश्च स्वे च स्वे एकशेषः । तैः स्वैः वत्सवत्सपालगोपालयादवकौरवादिभिः, गोगोपीयादवीकौरवीप्रभृतिभिश्च कौमाराद्यवस्थासु यथोपयोगं यथावसरं राजते इति स्वराट् । तेन सर्वानुग्राहकत्वं सर्वो-

पास्यत्वञ्च स्वस्य दर्शितम् । विशेषतो ब्रह्ममोहनलीलामाह ॥ कव-ये कवि ब्रह्माणमानन्दयितुम् आदि स्वरूपं प्रपञ्चान्वितं प्रपञ्च-वञ्चितञ्च तेने अदर्शयत् । अनेन, सर्वं विष्णुमयं जगत्, नेह नानास्ति किञ्चनेत्यादिश्रुत्यर्थो दर्शितः । ननु किमाशय एवम-तिरहस्यं स्वरूपम् अदर्शयत्, तमाशयमाह ॥ अमुह्यन्ति सूरय इति ॥ सर्वं खल्विदं ब्रह्मेत्यनया श्रुत्या प्रत्यक्षप्रमाणासिद्धस्य प्रपञ्चस्य बाधेन सर्वत्राऽखण्डब्रह्मज्ञानस्यातिदुर्घटत्वात् सूरयो विद्वांसोऽपि मुह्यन्ति । तादृशदर्शने असम्भावनाविपरीतभावना-दिभिर्व्याकुला भवन्ति । अनया लीलया श्रुत्युदाहरणरूपया तु अमुह्यन्ति । अ इत्यव्ययं निषेधे । लिङर्थो लट् लकारश्छान्दसः । तेन सूरयो न मुह्येयुरिति सम्भावयितुं तथाऽदर्शयादिति । तदपि हृदा मनसा सङ्कल्पमात्रेणैव, न बहुप्रयत्नैरिति । विशेषतो रास-लीलामाह ॥ यत्र तेजोवारिमृदां यथा विनिमयो जातः । यत्र रासलीलायामनन्तानन्तमूर्त्तेः स्वस्य तथा श्रीमतीनां गोपीनाञ्च चमत्कृतकन्दर्पकदम्बरुचिरतरमरीचिचयचुम्बितचारुमुखचन्द्रवृन्द-चन्द्रिकासुषमाभिस्तेजसां सकलकलाधरादीनां ज्योतिर्गणानां प्र-काशकानामपि प्रकाश्यभावं तेने । तेन, न यत्र सूर्य्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः * तमेव भान्तम-नुभाति सर्वं तस्य भासा सर्वमिदं विभातीत्यादिश्रुत्यर्थो दर्शि-तः । तथा निजवेणुकलरवेण वारिमृदां वारिणो यमुनाजलस्य सदा स्वतः प्रसरणस्वभावस्य स्तब्धत्वेन मृद्भावत्वं काठिनत्वं निश्च-लत्वं, तथा मृदां मृद्भेदानां गोवर्द्धनतरुलतानां स्थावराणामचेत-सामपि द्रवपुलकादिना जङ्गमचेतनधर्मत्वञ्च तेने । अनेन कर्तुमक-र्तुमन्यथाकर्तुं समर्थत्वस्येश्वरत्वस्य सूचनेन स्वभक्तानां सर्वथा स-र्वाभीष्टसाधकत्वं व्यञ्जितम् ॥ ४ ॥

यद्वा, अष्टादशसहस्रश्लोकात्मकं श्रीमद्भागवतमालामन्त्रं द्योतयन् मन्त्रदेवतयोश्चाभेदमुपदिशन् भगवान् कृष्णद्वैपायनः श्रीमद्भागवतमेव ध्यायन् मङ्गलमाचरति ॥ जन्मेति ॥ यत् श्रीमद्भागवतं यतः पुरुषस्य जन्मादि अस्य = निरस्य ब्रह्मस्वरूपं तेने । ब्रह्मैव सन् ब्रह्माप्येतीति श्रुतेः । तद्धीमहीति सम्बन्धः । यतते इति यत् तस्य यतः प्रयत्नं कुर्वतः स्वनिष्ठस्येत्यर्थः । प्रयत्नो नाम, आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति श्रौतः । तत्र श्रवणं तु, उपक्रमोपसंहारावभ्यासोऽपूर्वताफलम् * अर्थवादोपपत्ती च लिङ्गं तात्पर्य्यनिर्णये इत्युक्तषड्लिङ्गैः समग्रग्रन्थस्य तात्पर्य्यावधारणम् । मननञ्च, श्रवणावधारितेऽप्यर्थे रजस्तमोभ्यां प्राप्तस्यासम्भावनाविपरीतभावनादेस्तत्तदुक्तयुक्तिभिर्निरासः । निदिध्यासनं तु, संशयादिशून्यस्य शास्त्रार्थस्याविच्छिन्नधाराप्रवाहेनाऽनुचिन्तनमिति । अस्येत्यत्र असुधातोः क्त्वाप्रत्ययस्य समासं विनाऽपि ल्यबादेशश्छान्दसः । आदीति ब्रह्मविशेषणम् । अनेनैव सांख्याभिमताः षड्भावविकारा निरस्ताः । चेति समुच्चये । पुनः यत्पदोक्तस्य श्रीभागवतस्य सर्वशास्त्रेभ्यः सर्वथा श्रेष्ठत्वप्रतिपादकानि समानाधिकरणानि षड्विशेषणानि। यथा– अन्वयात्, इतरतः, अर्थेष्वभिज्ञः, स्वराट्, धाम्ना स्वेन सदा निरस्तकुहकं, सत्यं परम् इति । तत्र, अन्वयः = सन्ततिः । सन्ततिर्गोत्रजननकुलान्यभिजनान्वयावित्यमरः । सा हि द्विधा । पुत्रपौत्रादिरूपा, शिष्यप्रशिष्यादिरूपा च । अन्वयेन शिष्यादिसन्तत्या अत्यते गम्यते प्राप्यते वा इत्यन्वयात् । यद्वा अनु प्रतिपदम् अयं शुभाऽदृष्टं धर्म्मादिजनकम् आतयति प्रापयतीति अन्वयात् । यद्वा, अन्वयमनादिसंसारसम्बन्धम् अत्तीति अन्वयात्, संसारनिवर्तकमित्यर्थः ॥ इतरत इति ॥ इतं ज्ञानं राति ददातीति

इतरं, प्रथमैकवचने तसिल् । अनेन संसारनिवर्तकत्वमुपपादितम् । यद्वा, अन्वयादितरत इत्येकमेव पदम् । तत्र पञ्चैव विशेषणानि । अत्र पक्षे अन्वयस्य संसारसम्बन्धस्य आदि मूलाज्ञानं, तद् तरतः तर्तुका-मस्येति षष्ठ्यन्तम् । यत इत्यस्य विशेषणम् । पुनः, अर्थेष्वभिज्ञः स्वराट् इति पदद्वयम् । अर्थेषु प्रकरणाऽभिधेयेषु ये अभिज्ञा उ-पक्रमुक्त्या तात्पर्यावधारणचतुरास्तेषु स्वेन स्वरूपेण राजते इति । यद्वा, एकमेव पदम् । अत्र अर्थोऽवधारितं वस्तु परमात्मा । तस्मि-न्निष्वभिज्ञास्तल्लक्ष्यसाधने दक्षास्तेषु स्वराट् । तदुक्तं कठोपनिष-दि– आत्मानं रथिनं विद्धीत्यादिना । अत्रापि वक्ष्यति–आहुः शरीरं रथमिन्द्रियाणि हयानभीषून् मन इन्द्रियेशम् * वर्त्मानि मात्रा धिषणां च सूतं सत्त्वं बृहद्बन्धुरमीशसृष्टम् ॥ अक्षं दशप्रा-णमधर्मधर्म्मौ चक्रेऽभिमानं रथिनं च जीवम् । धनुर्हि तस्य प्रणवं पठन्ति शरं तु जीवं परमेव लक्ष्यमिति ॥ श्रीभागवतस्वरूप-श्च गौरीतन्त्रे श्रीशिवेनोक्तम् - प्रथमश्च द्वितीयश्च चरणौ द्वौ प्र-कीर्तितौ * तृतीयश्च चतुर्थश्च द्वावूरू समुदीरितौ ॥ पञ्चमो नाभिदेशश्च षष्ठो हृदयमेव च । सप्तमश्चाष्टमश्चैव बाहू द्वौ परि-कीर्तितौ ॥ नवमः स्कन्धदेशः स्याद्दशमो मुखमुच्यते । एका-दशो भालतटं द्वादशस्तु शिखोच्यते ॥ एवं सर्वं भागवतं श्रीहरे-र्मूर्तिरुच्यते । रसिकास्तद्विजानन्ति नान्येषां पदमत्र हीति ॥ यद्वा तत्स्वरूपमत्रैव वक्ष्यति । यथा, कृष्णे स्वधामोपगते धर्म्मज्ञाना-दिभिः सह * कलौ नष्टदृशामेष पुराणार्कोऽधुनोदित इति । अ-त्रेदं तत्त्वम् । विलोकतिमिरहर्ताऽर्को हि त्रिलोक्या एव, बाह्यमेव, दिनेष्वेव, सावशेषमेव, अतिरोहितमेव तमो हन्ति, न सदा सर्वतः । अयन्तु श्रीमद्भागवतार्को ब्रह्माद्यनन्तान्तस्य लोकस्याऽऽभ्यन्तरं तिरोहितमपि तमः सर्वदा सर्वप्रकारेण निःशेषमेव हन्तीति द्विती-

यार्कोदयो विफल इत्यपि नाऽऽशङ्कनीयमिति।

अस्यार्करूपकत्वमित्थमनुसन्धेयम्। गगनमण्डलस्थो हि सूर्यो, द्वादशात्मा शीघ्रमन्दसमगतिभिश्चलन् लघुदीर्घसमदिनानि प्रकटयन् षट्सु ऋतुषु रसविशेषान् शीतोष्णादीननुभावयति तथा श्रीमद्भागवतार्कोऽपि द्वादशस्कन्धाऽऽत्मा कर्मज्ञानोपासनागतिभिश्चरन् भोगमोक्षप्रेमभक्तिसुखानि प्रकाशयन् षट्सु ज्ञानेन्द्रियेषु लोकोत्तरान् रसविशेषाननुभावयतीति। पुनः, धाम्ना स्वेन सदा निरस्तकुहकम्॥ स्वेन धाम्ना स्वरूपेण सघनघनश्यामाद्रिभुजमुरलीधरवासुदेवरूपेण उक्तार्करूपेण वा सतां स्वनिष्ठानाम् आ सम्यग् निरस्तं कुहकं येन तत्। पुनः सत्यं सत्यविषयत्वात्। पुनः परम्। उक्तयुक्त्या सर्वशास्त्रोत्तरम्। अयं भावः। भगवान् वेदव्यासो द्वापरान्ते वेदेतिहाससप्तदशपुराणानि विभज्य विचार्यापि आत्मप्रसादमलभमानस्तत्र तत्रापरितुष्यन् परमकारुणिकतया सर्वेभ्यो वेदेतिहासपुराणादिभ्यः सारं सारं समुद्धृत्याधिकारिजनचित्तप्रसादायैतत्पुराणञ्चकार। प्रथमस्कन्धे प्रथमाध्याये ऋषीणां प्रश्नः। त्वया खलु पुराणानीत्यारभ्य, अतः साधोऽत्र यत् सारं समुद्धृत्य मनीषया * ब्रूहि नः श्रद्दधानानां येनाऽऽत्मा सुप्रसीदतीत्यादिः। दशमस्कन्धे, इत्यशेषसमाम्नायपुराणोपनिषद्रसः * समुद्धृत इत्याद्यभ्यासश्च। सर्ववेदान्तसारं हि श्रीभागवतमिष्यते * इत्युपसंहारश्चेममेवाऽर्थमावेदयतीति। ननु, तेने इति भूतनिर्देशेन इदानीन्तनेषु स्वरूपं न प्रकाशयतीत्येवावगम्यते। तत्राह॥ मुह्यन्ति यत्सूरय इति॥ ये शास्त्रकुशलाः सूरयो हृदा नमनेन। उपलक्षणमेतच्छ्रवणादीनाम्। श्रवणादिभक्तिरसावेशेन मुह्यन्ति रसविवशा भवन्तीति वर्तमाननिर्देशेन तेषाञ्च सदैव तनोतीत्याक्षिप्यते इति। रसविवशत्वञ्चालङ्कारविद्भिः सात्त्विकगुण-

त्वेनोक्तम् । यथा, स्वेदस्तम्भोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः * वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका मता इति । अत्रापि च– यदा विकारो नेत्रे जलं गात्ररुहेषु हर्ष इति । गौरीतन्त्रे च, रसिकास्तद्विजानन्ति, नान्येषां पदमत्र हि * इति । पुनः कथम्भूतम् ॥ यत्र त्रिसर्गो मृषा इति ॥ यत्र यस्मिन् भागवते विचारिते इति शेषः । तिसृणामवस्थानां जाग्रदादीनां सर्गः स्वभावो विश्वादिर्मृषा भवति । तुरीयस्यैव सत्यत्वात् । यद्वा, त्रयाणां कायिकादीनां कर्म्मणां सर्गस्त्यागः सन्न्यासो मृषा भवति । तेषामपि भगवदर्पितत्वेन भक्तिद्वारा तत्त्वज्ञानपर्य्यवसायित्वात् । वासुदेवे भगवति भक्तियोगः प्रयोजितः * जनयत्याशु वैराग्यं ज्ञानञ्च यदऽहैतुकमिति वचनात् । यद्वा, त्रयाणां ब्रह्मादीनां भेदयुक्तानां सर्गो निश्चयो मृषा भवति । वस्त्वैक्यविकाशेनौपाधिकभेदस्यावास्तवत्वात् । यद्वा त्रयाणां गुणानां सर्गः सृष्टिः । सर्वोऽपि प्रपञ्चो मृषा भवति। अज्ञानकार्य्यस्य ज्ञानैकनिवर्त्यत्वाद् रज्जुसर्पवदिति । अत्र दृष्टान्तः ॥ कवये तेजोवारिमृदां यथा विनिमय इति ॥ कवये कवेः, तदर्थं वा । कविरत्र सांख्यादिशास्त्रज्ञः । विनिमयोऽन्यस्मिन्नन्यप्रतीतिः । तेनाऽयमर्थः । तेजसो महाभूतभेदस्य विनिमयो ग्रहनक्षत्रदीपादिः।वारिणो विनिमयो फेनोपलतुषारादिः। मृदो विनिमयो नगवृक्षादिः । ते तु अतिमूढस्य वस्तुतस्तत्त्वान्तरतया प्रतीयन्ते । कवेस्तु कार्य्यकारणभावेन कारणतयैव प्रतीयन्ते । यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं भवति । वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्यादिश्रुतेः । कार्य्यकारणवस्त्वैक्यमर्शनं पटतन्तुवद् * इतिस्मृतेश्च । तथा श्रीमद्भागवते विचारिते सर्वाण्यपि कार्य्यकारणानि परमकारणतया प्रतीयन्ते इति । नेह नानास्ति किञ्चन, सर्वं खल्विदं ब्रह्मेत्यादि । तथा सर्वं

विष्णुमयं जगत्, सकलमिदमहञ्च वासुदेवः, वासुदेवः सर्व्वमिति स महात्मा सुदुर्लभ इत्यादिश्रुतिस्मृतिसारार्थस्यैवाऽत्र प्रतिपादनात्। द्रव्यं कर्म्म च कालश्च स्वभावो जीव एव च * वासुदेवात् परो ब्रह्मन्नचान्योऽर्थोऽस्ति तत्त्वत इत्यादिष्विति ॥ ५ ॥

यद्वा, यत्राधिकृत्य गायत्रीं वर्ण्यते धर्म्मविस्तरः * वृत्रासुरवधोपेतं तद्भागवतमिष्यते इति मत्स्यपुराणात्। तथा, ग्रन्थोऽष्टादशसाहस्रो द्वादशस्कन्धसम्मितः * हयग्रीवब्रह्मविद्या यत्र वृत्रवधस्तथा। गायत्र्या च समारम्भस्तद्वै भागवतं विदुरिति वामनपुराणात्। गायत्रीभाष्यरूपोऽयं द्वादशस्कन्धसंयुतः * ग्रन्थोऽष्टादशसाहस्रः श्रीमद्भागवताभिध इति गौरीतन्त्राच्चास्य पुराणस्य गायत्रीभाष्यरूपत्वं, गायत्र्यारम्भत्वञ्च प्रतीयते। तच्च गायत्रीभाष्यं नाम तद्विवरणम्। तच्च जीवश्वेरयोः शुद्धतत्त्वम्पदयोरेकत्वेनोपपादनम्। यत्ते रूपं कल्याणतमं तत्ते पश्यामि, योऽसावादित्ये पुरुषः सोऽहमस्मीति श्रुतेः। तच्च श्रीमद्भिः सर्वज्ञैः स्वामिपादैः सुविस्तरं समग्रग्रन्थेनोपपादितम्। गायत्र्यारम्भस्तु, धीमहीति पदेनैव गायत्र्याः प्रारम्भेण च गायत्र्याख्यब्रह्मविद्यारूपमेतत्पुराणमिति दर्शितमित्युक्तं, न त्वानुपूर्व्येण। अत एवेदानीं जन्माद्यस्येति पद्येन गायत्र्यर्थो निरूप्यते। तथाबहुभिर्विशेषणैरुपपत्त्या चास्मिन्नेव पद्ये सामान्यतो भाष्यरूपत्वञ्चोपपादितं ज्ञेयमिति। तत्र गायत्र्यारम्भो नाम, तत् सवितुर्वरेण्यमितिमन्त्रेणैवारम्भ इति चेन्न। पुराणस्य वेदविवरणरूपत्वाद् गायत्र्यर्थप्रतिपादकश्लोकेनाऽऽरम्भ एव गायत्र्यारम्भो विवक्षितो, न तु गायत्रीस्वरूपेण। तथा सति श्रुतिस्मृत्योर्भेदाप्रतीतेरिति। तदुक्तं स्मृतौ। पुराणं धर्म्मशास्त्रञ्च वेदार्थपरिबृंहणमिति। श्रवणाच्छ्रुतिरित्याहुः स्मरणात् स्मृतिरुच्यते इत्यादि। श्रुतेरिवार्थं स्मृतिरन्वगच्छदितिशिष्टोक्तेश्च। तत्रादौ गायत्री यथा,

तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयादिति।
अस्या अर्थस्तु, तत् तस्य प्रसिद्धस्य देवस्य दिवि द्योतमानस्य सवितुर्विश्वप्रसवकर्तुर्यो भर्गोऽज्ञानादिद्वैततृणभर्जको मण्डलस्थः पुरुषविशेषस्तेजोरूपो नोऽस्माकं जीवानां धियो धीवृत्तीः प्रचोदयात् दृष्टादृष्टफलजनकेषु कर्म्मसु प्रेरयति तं वरेण्यं वरणीयं सर्वोत्तमं पुरुषम् आत्मत्वेन धीमहि ध्यायेम इत्याशंसा॥
वस्तुतस्तु सवितुर्देवस्येत्यत्र उपचारे षष्ठी, राहोः शिर इतिवत्। तेन यः स प्रसिद्धः सविता देवो भर्गः सर्व्वानर्थभर्जको नोऽस्माकं धियः प्रचोदयात् तं वरेण्यं धीमहीत्येव प्रतिभातीति मनसि निधाय भगवान् कृष्णद्वैपायनो मङ्गलमाचरति॥ जन्माद्यस्येति॥ यतः यस्मात् सवितुरस्य विश्वस्य जन्मादि भवतीति शेषः, तस्य तेजो भर्गो धीमहीति सम्बन्धः। यच्छब्दस्य उद्देश्यसमर्पकत्वात् सवितृसमर्पकत्वं युक्तमेवं भर्गपदस्य भर्जनकर्तृत्वाद्युक्तमेव तेजोवाच्यत्वमिति। तथोक्तं योगियाज्ञवल्क्येन। सविता सर्वभूतानां सर्वभावान् प्रसूयते * सवनात् पवनाच्चैव सवितेत्युच्यते हि सः॥ १॥
भ्रस्जो पाके भवेद्धातुर्यस्मात् पाचयते ह्यसौ। भ्राजते दीप्यते यस्माज्जगच्चान्ते हरत्यपि॥ कालाग्निरूपमास्थाय सप्तार्च्चिः सप्तरश्मिभिः। भ्राजयेद्यत्स्वरूपेण तस्माद्भर्गः स उच्यते। तथा च, भेति भीषयते लोकान् रेति रञ्जयते प्रजाः * ग इत्यागच्छत्यजस्रं भगवान् भर्ग उच्यते इति। यच्छब्देनोक्तस्य सवितुर्विशेषणं स्वराडिति। स्वः स्वर्गे आसम्यगटतीति स्वराट्। यद्वा स्वेन असाधारणस्वरूपेण राजते इति स्वराट्। अनेन देवपदं व्याख्यातम्। यदाह योगियाज्ञवल्क्यः। दीव्यते क्रीडते यस्माद्रोचते द्योतते दिवि * तस्माद्देव इति प्रोक्तः स्तूयते सर्वदैवतैरिति। चः समुच्चये। पुनः कथम्भूतः सविता॥ अरिमृदां हृदायः॥ अरिभिः

कामादिभिः षडिन्द्रियैर्वा मृद्यन्ते पीड्यन्ते इति अरिमृदो बुद्ध्या-दिपरतन्त्रा जीवास्तेषां हृदायः । हृत् अन्तःकरणम् । आययति दृष्टादृष्टार्थकर्म्मसु प्रेरयतीति हृदायः । एतेन पदद्वयेन, धियो यो नः प्रचोदयादिति पदचतुष्टयं व्याख्यातम् । यथाऽऽह स एव । चिन्तयामो वयं भर्गं धियो यो नः प्रचोदयात् ॥ धर्म्मार्थकाममोक्षेषु बुद्धिवृत्तीः पुनः पुनरिति ॥ धीमहीति स्वरूपमेवोक्तम् । यच्छब्देनैव तच्छब्द आक्षिप्यते । यथाह स एव, यच्छब्देनैव तच्छब्दो बोद्धव्यः सततं बुधैः ॥ उदाहृते तु तच्छब्दे यच्छब्दः स्यादुदाहृत इति । तेजसो विशेषणं परमिति ॥ परं सर्वोत्तममित्यर्थः । एतेन वरेण्यपदं व्याख्यातम् । एवमेभिरुक्तपदैः सर्वो गायत्र्यर्थो व्याख्यातः । अवशिष्टानि पदानि भाष्यरूपत्वप्रतिपादनाय यथासम्भवं विशेषणतया योज्यानि । यथा तेजसोऽग्न्यादितेजोव्यावर्तनाय वरेण्यत्वप्रतिपादनाय च चत्वारि विशेषणानि— आदीति, यथा विनिमयो यत्र त्रिसर्गो मृषेति, धाम्ना स्वेन सदा निरस्तकुहकमिति, सत्यमिति च । तत्र आदिपदेन, तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति श्रुतेः सर्वतेजसां तेजस्त्वेन वरेण्यत्वं सिद्धम् । एवं यत्र, यस्मिन् तेजसि मृषाऽपि त्रिसर्गः त्रयाणां मायागुणानां सर्गो भूतेन्द्रियदेवतादिरूपो, यथा यथावदेव, वा एवार्थे । विनिमयः सत्यरूपो व्यवहारदशायां भातीति शेषः । तत् यत्सत्यतया मृषासर्गोऽपि रज्जुसर्पवदधिष्ठानसत्तयैव सद्वन् प्रतीयत इत्यर्थः । असङ्गो ह्ययं पुरुष इति श्रुतेः । प्राप्तत्रिसर्गसम्बन्धं वारयति ॥ धाम्ना स्वेन सदा निरस्तकुहकमिति ॥ सदा कालत्रयेऽपि स्वेन महसैव निरस्तं कुहकं सङ्गदोषो येन तत् । अत एव, सत्यं सर्पभ्रमस्य अधिष्ठानाबाधित्वाभ्यां रज्जुवत् । कालत्रयव्यापिपूर्णमित्यर्थः । पुनः यत इत्यस्य सवितृसमर्पकस्य अन्वयव्यतिरेकाभ्यां कारणत्वोप-

पादकं विशेषणम् ॥ अन्वयादितरत इति ॥ अन्वीयते नामरूपाभ्यामन्यतया प्रतीयते इत्यन्वयः कार्य्यं तस्मात् । इतरतश्च कार्य्यादन्यस्माच्च यथा मृदेव नामरूपाभ्यां घटशरावादितया प्रतीयते तेभ्यो भिन्ना च तथा । अनेन सर्वात्मकत्वं सिद्धम् । तत्र सांख्याभिमतं प्रधानस्य सर्वात्मकत्वं वारयन् विशिनष्टि ॥ अमुह्यन्ति यत् सूरयः कवये ब्रह्म तेने इति षड्भिः पदैः । यदित्यव्ययम् । ये सूरयो विवेकिनः, कवये, कौति वेदं याज्ञवल्क्यादिभ्यो वा । कस्य ब्रह्मणो विः पक्षीति सङ्केतं नाम, काविर्हंसः, तस्मै । तं प्रसादयितुम् । अमुह्यन्ति न प्रमत्ता भवन्ति, तेषां ब्रह्मस्वरूपभूतं ज्ञानं तेने तनोतीत्यर्थः । तत्र हेतुगर्भविशेषणम्– अर्थेष्वभिज्ञः ॥ अर्थेषु भक्तानां तत्तत्प्रयोजनेषु अभितः सर्वमुपायं जानातीति अभिज्ञः । अयम्भावः । ये भक्ता येष्वर्थेषु धर्म्मादिषु तत्तन्निमित्तं भजन्तो न मुह्यन्ति ताँस्तु सर्वान् स्वयं सर्वज्ञो भगवान् विवेकिनो विधाय अर्थाद्यर्पयँस्तद्भोगावसरे तेषामर्थेष्वनर्थानुसन्धानेन वैराग्यमुत्पाद्य स्वरूपं ददातीति परमकृपालुत्वमसर्वज्ञत्वजडविलक्षणत्वसर्वान्तर्यामित्वादि सम्पादितम् । यः सर्वज्ञः सर्ववित्, सूर्य्य आत्मा जगतस्तस्थुषश्च, तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्, परोरजः सवितुर्जातवेदो देवस्य भर्गो मनसेदं जजान * शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् — सुरेतसादः पुनराविश्य यष्टे हंसं गृध्राणं नृषद्रिङ्गिरामिम इत्यादिश्रुतेः ॥ ६ ॥

वासुदेवप्रसादेन वासुदेवप्रसादिनी ॥
कृता कृपालवेनेमां समीक्षन्तां कृपालवः ॥ १ ॥
मोदन्ते पितरः प्रायोऽबद्धैर्बालकभाषितैः ॥
इति साहसमास्थाय कृतेयं कृष्णतुष्टये ॥ २ ॥
श्रीजगन्नाथनाथेन श्रीजगन्नाथशर्म्मणा ॥
जन्माद्यस्येतिपद्यस्य रसव्याख्या कृता मुदा ॥ ३ ॥

इति श्रीमद्भागवतीय-जन्माद्यस्येत्याद्यश्लोकविवृति-
रसव्याख्यासमाख्या संपूर्णा ॥

विज्ञापनम् ।

बनारससंस्कृतसीरीजनाम्नी वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्राचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य कृते ।॥।) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां कृते १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

तत्र मुद्रिता ग्रन्थाः ।

	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १३	१३	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यम् सभाष्यं ख०६	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयम् खण्डानि ६ (प्रथमभागः प्रथमद्वितीयकाण्डे पुण्यराजटीकासहिते खण्डानि ३ । द्वितीयभागः तृतीयकाण्डम् हेलाराजटीकासहितं खण्डानि ३)	६	०
रसगङ्गाधरः खण्डानि ९	९	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ४	४	०
हर्षिकात्यायनप्रणीतं शुक्लयजुःसर्वानुक्रमसूत्रम् सभाष्यम्	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम् खण्डानि ४	४	०
वैयाकरणभूषणम् पदार्थदीपिकासहितम् खण्डानि ४	४	०
न्यासः सटीकवाक्यसुधासहितः खण्डे २	२	०

तत्त्वदीपनम् । पञ्चपादिकाविवरणस्य व्याख्यानम्) खं० ८ ८ ०
वेदान्तदीपः (श्रीभगवद्रामानुजाचार्यविरचित.) खण्डानि ३ ३ ०
टुप्टीका खण्डानि ४ ४ ०
पातञ्जलदर्शनम्।श्रीरामानन्दयतिकृतमणिप्रभाऽख्यवृत्ति स० १ ०
व्याकरण मिताक्षरा । श्रीमदन्नभट्टप्रणीता खण्डानि १० १० ०
रसमञ्जरी । व्यङ्ग्यार्थकौमुद्या प्रकाशेन च सहिता ख० ३ ३ ०
भेदधिक्कारः व्याख्यासहितः श्रीमदप्पयदीक्षितकृत उपक्रम-
पराक्रमसहितः खण्डे २ २ ०
बोधसारोनरहरिकृतः तच्छिष्यदिवाकरकृतटीकयास०ख० १० ०
ब्रह्मसूत्रदीपिका श्रीमच्छङ्करानन्दभगवद्भिरचिता खण्डे २ २ ०
दैवज्ञकामधेनुः अर्थात् प्राचीनज्यौतिषग्रन्थः खण्डानि ३ ३ ०
श्रीमदणुभाष्यम् । श्रीश्रीवल्लभाचार्यविरचितम् ।
गोस्वामिश्रीपुरुषोत्तमजी महाराजविरचितभाष्यप्रकाशाख्य
व्याख्या समेतम् खण्डानि १५ १५ ०
तत्त्वशेखरः । श्रीभगवल्लोकाचार्यप्रणीतः । तथा-तत्त्वत्रयचुलुक
संग्रहः । कुमारवेदान्ताचार्यश्रीमद्वरदगुरुविरचितः । १ ०
श्रीभाष्यवार्तिकम् । श्रीमद्रामानुजाचार्यविशिष्टाद्वैतसिद्धान्तप्र-
तिपादनपरम् । यतीन्द्रमतदीपिका च । श्रीगोविन्दाचार्यसूनु-
श्रीनिवासाचार्यकृता । सकलाचार्यमतसंग्रहश्च । खण्डे २ २ ०
गूढार्थदीपिका । श्रीमद्भागवतदशमस्कन्धस्थरासपञ्चाध्यायी-
व्याख्या । रसव्याख्या च । खण्डानि ३ ३ ०
आश्वलायनसूत्रप्रयोगदीपिका । श्रीविद्वद्वरमंचनाचार्यभट्ट-
विरचिता खण्डे २ । २ ०
काव्यालंकारसूत्राणि । पण्डितवरवामनविरचितवृत्तिसमेतानि
कामधेनुसमाख्यव्याख्यासहितानि खण्डे २ । २ ०
श्रुत्यन्तसुरद्रुमः । श्रीपुरुषोत्तमप्रसादविरचितः खण्डानि ३ ३ ०
चतुर्विंशतिमतसंग्रहः । श्रीभट्टोजिदीक्षितसंकलितः खण्डे २ २ ०
श्रीविद्वन्मण्डनम् श्रीविठ्ठलनाथदीक्षित विरचितम् । गोस्वामि श्री-
पुरुषोतमजीमहाराजविरचित सुवर्णसूत्राख्यव्याख्यासहितम् २ ०
सांख्यायनगृह्यसङ्ग्रहः । कौसुंवरवास्तव्यपण्डितवरवासुदेव
विरचितः । १ ०